अद्वैतवादखण्डनम्।

प्रस्तावना।

सुराचार्य्यसमसर्व्वदर्शनमर्म्मविदुदयनाचार्य्य-सर्व्वमीमांसातर्क-पारगामिचिन्तामणिग्रन्थकारगङ्गेशोपाध्याय--चिन्तामणिमन्त्रसाधक-रपक्षधरमिश्र---सर्व्वजनसुप्रसिद्धवासुदेवसार्व्वभौम ---वासुदेवसम-गौराङ्गदेव-सर्व्वज्ञप्रायदीधितिकाररघुनाथशिरोमणि-प्रसिद्धनिबन्ध-कारमथुरानाथ--जगदीश--गदाधरप्रभृत्यलौकिकसूक्ष्मधीसम्पन्नदूर-दर्शिभिर्भगवदक्षपाद-कणाद-महर्षिप्रणीतदर्शनशास्त्रस्य निःश्रेय-सासन्नतरोपायप्रतिपादकतामवधार्य्य चिरनिरन्तरसमादरसेवया समया अतिवाहिताः। सर्व्वदर्शनखण्डनचक्राकर्षेणापि गौतमोक्त-तर्कशास्त्रस्य प्रमाणादिषोड़शपदार्थनिर्व्वचनरूपस्य निर्व्वाणासन्न-तरोपायनिर्द्देशकत्वं स्वीकृतमिति तत्कृतं श्लिष्टकाव्यं हृदाव-धारितम्।. तत् काव्यं यथा—

उद्देशपर्व्वण्यथ लक्षणेऽपि
द्विधोदितैः षोड़शभिः पदार्थैः।
आन्वीक्षिकी यद्दशनद्विमाली
तां मुक्तिकामाकलितां प्रतीम इति ॥

परमश्रद्धेयतावीजं महर्षिप्रणीतत्वं महात्मगणसेवितत्वञ्च परिज्ञाय सर्व्वैरेव विज्ञैर्मुमुक्षुभिस्तद्दर्शनावगमार्थं यतितव्यमिति वितर्क्य तद्दर्शनाध्ययनाध्यापनाव्रतपरैः सद्भिरस्माभिः सप्रीतिचिरसमयातिपातः कृतः, कृतञ्च तदर्थनिरूपणोपयोग्युपनिषदादिप्रतिसन्धानं युक्त्युद्भावनञ्च । तच्चेन्महात्मगणानुमतं भवेत् श्रममिमं सफलं मन्यामहे ।

उमागतायाऽप्यनुमागताय
कामस्य हन्त्रेऽखिलकामदाय ।
संहारकर्त्रेऽपि च शङ्कराय
नमोनमस्तं शरणं प्रपद्ये ॥ १ ॥

मातर्ममाऽतितमसाऽऽवृतमाद्यविद्ये
चेतोऽतिकुत्सितचिताश्रितमीशहृद्ये ।
नाऽन्ये स्पृशन्तु घृणयन्तु सुराः शरण्ये
नोपेक्ष्यमत्र नटनं तव दक्षकन्ये ॥ २ ॥

नेत्रत्रयान्वितसिताननमीश्वरत्वात्
सिन्दूरसुन्दरतनुं कमलासनत्वात् ।
शङ्खादिशोभितचतुर्भुजमच्युतत्वा-
च्चण्डीसुतं तमिह ढुण्ढिगणेशमीडे ॥ ३ ॥

हानी न चाऽऽस्तिकत्रयस्य कदाऽपि यस्यां
चार्व्वाकपूर्व्वकसुपर्व्वचयद्विषाञ्च ।
श्रेयोनिबन्धननिबन्धसमाप्तिबीजं
वाग्देवतां श्रुतिगतां हृदि तां स्मरामि ॥ ४ ॥

सीतानाथ पितः* प्रबन्धनविधिश्वाघातविध्वंसनं
माता साधव सीलया विमलया† श्रीतांशुसोदर्य्यया‡ ।
नीलाम्भोरुहनिन्दिनीलमणिभाःशोभाकरं शोभया
संगृह्य स्वगुणेन विग्रहमनुग्राह्यस्य चित्ते वसन् ॥ ५ ॥

काव्यव्याकरणाब्धिपारकरणे यः कर्णधारायते
तद्धीमज्जयरामपादकमलात् चोदाख्यलाभे कृते ।
लब्धोऽभूदयदुरामपादगमणिर्यः सर्व्वविद्याखनिः
चोदोऽशिक्षत भास्करात् हलधराद्यस्तकंचूड़ामणिः ॥ ६ ॥

सुबुधमुदभिलाषादुभट्टपल्लीनिवास-
स्थिरगिरिशपदाश्रः श्रीलराखालदासः ।
मुनिमतमनुगच्छन् न्यायरत्नचिरत्नं
रचयति नवयुक्त्या खण्डनग्रन्थरत्नम् ॥ ७ ॥

करोति खण्डनग्रन्थं न्यायरत्नोऽतियत्नतः ।
पण्डितं मण्डयेदेतदुरत्नखण्डनमण्डनम् ॥ ८ ॥

हृद्देशं भूषयेत् कोऽपि रत्ननिर्म्मितमालया ।
कोऽपि वा दशनैश्छित्त्वा तृणवत्ताश्च मुञ्चति ॥ ९ ॥

---

* सीतानाथ पितः—हे परमेश्वर परमकारुणिक श्रीरामचन्द्र हे जगत्पितः, पक्षे हे सीतानाथनाम्ना प्रसिद्ध मदीयजनक ।

† विमलया—मालिन्यादिदोषरहितया, पक्षे विमलानाम्न्या मदीयमात्रा ।

‡ श्रीतांशुसोदर्य्यया—क्षीराब्धिजातत्वेन सुधाकरसहोदरया अर्थात् लक्ष्मीरूपया, पक्षे चन्द्रगुणसदृशाप्राकृतसौन्दर्य्यादिरूपपवित्रगुणसम्पन्नया ।

अद्वैतवादखण्डनम् ।

"सदेव सौम्येदमग्रआसीत् एकमेवाद्वितीय"मिति छान्दोग्योपनिषद्भागस्य व्याख्या ।—इदमग्रे अर्थात् सृष्टिप्राक्‌क्षणे सदेव अर्थात् ब्रह्मैवासीत् । सच्छब्दोऽत्र ब्रह्मवाचकः, "ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत" इतिस्मरणात् । ब्रह्मत्वञ्च प्रत्यक्षाश्रयत्वं सृष्टिकर्त्तृत्वादिकञ्च, उपनिषद्भागे तदैक्षतासृजतेत्येव विवृतिः सत्त्वात्, न तु नित्यविज्ञानानन्दस्वरूपत्वम् । दर्शितोपनिषत्सु तद्बोधकवाक्यासत्त्वात् । "ज्ञोऽत एवे"ति व्याससूत्रेण ब्रह्मणो ज्ञानाश्रयताया एव प्रतिपादितत्वात्, ब्रह्मणोबोधस्वरूपताखण्डकबहुविचारस्य स्थानान्तरे मया प्रदर्शितत्वाच्च । तद्वाक्यस्य-सदेवेत्येवकारस्तु असदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमिति शङ्कासूत्रलब्धम् एकमेवाद्वितीयं यदसत् अर्थात् प्रलयकाले एकमेव शून्यत्वं तन्मात्रस्य व्यवच्छेदकः, न तु ब्रह्मेतरयावत्पदार्थानाम् । तथा सति तद्वाक्यस्थस्य द्वितीयैवकारस्याद्वितीयपदस्य च व्यर्थतापत्तेस्तैत्तिरीयोपनिषद्‌विरोधापत्तेश्च । सा चोपनिषद् यथा, "असद्वा इदमग्र आसीत्ततो वै सदजायत । तदात्मानं स्वयमकुरुत" । अत्राऽसत्पदेन सत्पदप्रतिपाद्यं यद्‌ब्रह्म तद्भिन्नं परमाण्वादिकं लभ्यते, परमाण्वादीनां बहुत्वेन च छान्दोग्योपनिषद्वाक्य इवात्रैकमेवाद्वितीयमिति प्रयोगो नास्ति । ततो वै सदजायत, इत्यत्र सच्छब्दस्य सत्तावदर्थक-उत्पत्तिमदर्थकौ वेति । तदात्मानं स्वयमकुरुतेत्यंशस्य पर्य्यवसितार्थस्तु—शुक्रशोणितादीनि निर्म्माणकर्त्रन्तराणि चासहायीकृत्य परमाणुजातादृष्टानि सहकृत्य सृष्ट्यारम्भसमये ब्रह्मादिशरीरावच्छिन्नं

प्रयोज्यप्रयोजकशरीरावच्छिन्नस्वात्मानमसृजत नृसिंहादिवल्लीला-कैवल्यात् । अतएव पातञ्जलाः—"क्लेशकर्म्मविपाकाशयैरपरामृष्टो निर्म्माणकायमधिष्ठाय सम्प्रदायप्रवर्त्तकोऽनुग्राहकश्चे"ति । न चाऽऽत्मनो नित्यत्वेन कथं तस्य सृष्टत्वमिति वाच्यं, शरीररूपविशेषणस्य सृष्टत्वमादाय नित्यस्याप्यात्मनः सृष्टताया उपपादनीयत्वात् । अतएव "तदात्मानं सृजाम्यह"मिति वाक्यमपि । 'देवानां कार्य्यसिद्धार्थमाविर्भवति सा यदा । उत्पन्नेति तदा लोके सा नित्याप्यभिधीयत" इति च ॥ नोचेदद्वैतमतेऽप्यगतिः स्यात् । न चोक्तोपनिषत्स्थितासत्पदेनाविद्यैव प्रतिपाद्यते, अविद्याया अपि जगत्कर्त्तृत्वबोधकमहावाक्यसत्त्वात् । यथा "मायिकं जग"दिति वाच्यम्, अद्वैतवादिमते असत्पदेनाविद्याप्रतिपादनस्याऽसम्भवात् असच्छब्दस्याविद्याबोधकत्वे सदसद्भ्यामनिर्व्वचनीयमिति तदीयव्यवस्थाविरोधापत्तेः । द्विविधसत्यपदार्थसत्त्वे प्रमाणान्तरमपि, तद्यथा—"ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायते"-त्यादि । केवलब्रह्मणः सत्यत्वे समानार्थकसत्यपदस्य पुनरुक्ततापत्तेः परस्परभेदसूचक-चकारद्वयप्रयोगस्याऽसङ्गतत्वापत्तेश्च । अस्मन्मते च ऋतपदं परमाणुतात्पर्य्यकं सत्यपदन्तु ब्रह्मतात्पर्य्यकमतो न किञ्चिदप्यनुपपन्नम् । सकलोपनिषदादिमहावाक्यानां सारसंग्रहभूतभगवद्गीतोपनिषदन्तर्गतानि "भूमिरापोऽनलो वायु"-रित्यादिकतिपयवाक्यानि पर्य्यालोचितवतः कस्याप्यस्मत्प्रदर्शितमीमांसायां विवादलेशोऽपि न हि सम्भवेदिति सम्भावयामः । गीतास्मृतत्तद्वचनतात्पर्य्यलब्ध्यर्थं विशदभावेनाग्रे प्रदर्शयिष्यामः । सकलवैदिकशब्दानां नित्यत्ववादिमीमांसकैरपि महर्षिगौतम-कणाद-पतञ्जलिप्रभृतिवत् सदेव सोम्येत्याद्युपनिषद्-

व्याख्यानं कर्त्तुं न शक्यते इत्यद्वैतवादरसास्वादपरितुष्टचेतसां भाषणानि कुशलीभवन्तु। सदेव सौम्येदमग्रआसीदित्यंशस्या-द्वैतवादिव्याख्या तु—हे सौम्य इदमर्थात् जगत् सदेवासीत् प्रलय-दशायां ब्रह्मणि प्रातिभासिकसत्त्वेन व्यावहारिकसत्त्वेन च सर्पादे-रभानात्। एषा व्याख्या न समीचीना, सौम्यपदव्यवहितयोः सदेवेत्यंशेदंपदयोरासत्तिविरहेण स्वरससंवाहियथोक्तशाब्दबोधानि-र्व्वाहकत्वात्। उद्देश्यवाचकपद-विधेयवाचकपदयोः क्रमिकत्वेना-प्रयुक्ततया तयोः क्रमिकत्वस्याहार्य्यानुसन्धानापत्तेश्च। वस्तुत-स्तिङन्तार्थान्वयुद्देश्यविधेयवाचकपदयोः क्रमिकत्वमेव साका-ङ्क्षतानियामकमतएव तण्डुलानोदनं पचति, काशान् कटं करोति, एको वृक्षः पञ्च नौका भवति, काष्ठं भस्म भवति, घटो नीलो भवतीत्यादिकमेव प्रयुज्यतेऽभियुक्तैर्न तु तण्डुलपदौदनपदा-दीनां वैपरीत्येनापि। अतएवासीदिदं तमोभूतमिति महर्षि-वाक्ये उद्देश्यविधेयवाचकपदयोः क्रमिकत्वम्। एवं नीलघटो घट एव धान्यराशिर्धान्यमेवाभूद्घटो द्रव्यमेवाभूदित्यादिप्रयोगस्य विना लक्षणामदृष्टचरत्वेनोद्देश्यविधेयभावेनान्वयबोधस्थले एव-कारार्थे व्यापकधर्म्मावच्छिन्नस्य प्रकारविधयान्वयबोधो न प्रामा-णिकः, एवञ्च ब्रह्मत्वरूपव्यापकधर्म्मावच्छिन्नस्यैवकारार्थेऽन्वयो न भवितुमर्हति। अतः सदेवेत्यत्र सत्पदस्य व्यावहारिकसत्त्वानव-च्छिन्ने लक्षणामन्तरेण तद्वाक्यार्थान्वयबोधानुपपत्तिप्रसङ्गात्। किञ्च आसीदित्यंशस्थलङ्पदेन पूर्व्वकालस्य प्रतिपादिततया तदर्थकाग्र इतिशब्दस्य पुनरुक्ततापत्तेः। अतएवा"भूनृपो विबुध-सख" इत्यत्र, "स राशिरासीन्महसां महोज्ज्वल" इत्यत्र, "वसन् ददर्शावतरन्तमम्बरात्" इत्यत्र, "समाययौ युधिष्ठिरं द्वैतवने वने-

पर" इत्यत्र च महाकविप्रणीतेषु वाक्येषु, "आसीदिदं तमोभूत-मप्रज्ञातमलक्षण"मिति महर्षिवाक्येऽपि चाग्रेपुराप्रभृतिशब्दास्तैर्न प्रयुक्ताः। परन्तु लङादेः सामान्यतोऽतीतकालबोधकतया विशेष-कालबोधावश्यकत्वे कालविशेषबोधकपदप्रयोगो भवितुमर्हति, तादृशविशेषकालस्य लङादिप्रत्ययेनाप्राप्तत्वात्। स यथा, त्रेतायां रामोऽभूत्, द्वापरे द्वारकायां श्रीकृष्ण आसीत्। न चाग्र इत्यस्य सृष्टिप्राक्कालपरतयैव व्याख्येयतयेदृशविशेषकालबोधार्थमेव तत्पदं प्रयुक्तमिति वाच्यम्, तथा सति तत्पदस्य लाक्षणिकत्वा-पातात्; विना लक्षणामुपपत्तिसम्भवे तत्स्वीकारस्याऽन्याय्यत्वात्। अस्माकन्तु इदमग्रे अर्थात् सृष्टिप्राक्काले इति व्याख्यानेनैव सुसामञ्जस्यात्। व्युत्पन्नपरम्पराप्रचलितामौत्सर्गिकीं रीति-मवलम्ब्यैवोपनिषद्व्याख्यानं कृतम्। कुरुच्या परमते व्याख्या भवति चेद्भवतु। अपिच घटपटादिरूपनिखिलभूतादिभिः सार्द्धं ब्रह्मणः पारमार्थिकतादात्म्यबोधक-विवादानास्पदप्रमाणाभावात्। यतः सर्व्वं खल्विदं ब्रह्मेत्यादिवाक्यानां "कृत्स्नप्रसक्तिर्निरवयव-शब्दकोपो"वेति व्यासोक्ततर्काभ्यां भूतादिषु ब्रह्मणा सार्द्धं पारमार्थिकतादात्म्यं निरस्तम्। प्रलयकालीनज्ञानादिविशिष्ट-मेकं वा अनेकमित्याशङ्कानिवृत्त्यर्थमेकमेवाद्वितीयमिति। अस्य पर्य्यवसितार्थस्तु, प्रलयकालीनज्ञानादिमदेकमेव न त्वनेकम्। अद्वितीयमित्येवकारार्थस्य विवरणपरं शास्त्रकाराणामेषैव रीति-र्यदेवकारमुक्त्वा तदर्थविवृतये पदान्तरं प्रयुज्यते। यथा "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय"। "महेश्वर-स्त्र्यम्बक एव नापर" इत्यादि। अथवा एकमेवेत्यत्र एवशब्दः स्वायोगव्यवच्छेदपरः, प्रायशस्तादृशे अर्थ एव छान्दोग्योपनिषत्सु

प्रयोगदर्शनात् यथा "मृत्तिकेत्येव सत्यं," "लौहमित्येव सत्यं," "कार्ष्णायसमित्येव सत्यं," "त्रीणि रूपाणीत्येव सत्य"मित्यादि । इत्याद्येवकारार्थस्य इतरव्यवच्छेदरूपत्वं कथमपि नहि सम्भवति । वस्तुतस्तु संस्कारदार्ढ्यार्थमेकार्थकपदकदम्बस्योक्तिर्न खलु दोषाय । "जपात् सिद्धिर्जपात् सिद्धिर्जपात् सिद्धिर्न संशयः" । "सत्यं सत्यं न संशय" इत्यादि भूरिप्रयोगसत्त्वात् । अतएव छान्दोग्योपनिषत्सु सदेवेत्यादि-एकमेवाद्वितीयमित्यन्तवाक्यानां भूरिप्रयोगसङ्गतिः । अद्वैतवादिव्याख्या च, पुनरुक्तिभिया एकमेवेत्येवकारार्थः सजातीयद्वितीयराहित्यमद्वितीयमित्यंशस्य च विजातीयद्वितीयराहित्यमर्थः, एवं व्याख्यानेनाद्वैतवादिनां न किमपि नैपुण्यं तैश्च सदेवेत्यादिवाक्यसमुदायस्य पुनःपुनरुक्तेः क उपायः क्रियते । विजातीयद्वितीयराहित्ये सुस्पष्टप्रमाणासत्त्वाच्च विजातीयनिषेधबलेन तन्मतसिद्धाऽविद्यापि कथं स्थातुमर्हेत् । सा हि न किं विजातीयपदार्थान्तर्गता ।

"तेजः परस्यां देवतायां स य एषोऽणिमा । ऐतदात्म्यमिदं सर्व्वं स आत्मे"त्यन्तप्रतीकस्य व्याख्या । चरमसमयस्थितद्व्यणुकाद्यात्मकतेजांसि परस्यां देवतायामर्थात् परमाणुषु लीनानि भवेयुः । पुनः सृष्टिसमये परमाणूपादानकद्व्यणुकादिक्रमेण कार्य्याणि सृजेद्विश्वकर्त्ता परमेश्वर इति । परस्यामिति सप्तम्यन्तभेदवाचिसर्व्वनामपरशब्दसामर्थ्येन विनाशितेजःपार्थक्यं परमाणुषु लभ्यते । इत्येव सूक्ष्मतरो विचारः । एतेन परमाणुपुञ्ज एव जगत् न तु कार्य्यान्तरमिति पुञ्जवादो निरस्तः । परस्यां परत्वरूपगुणाश्रयीभूतायाम् । एतेन देवताशब्देन ब्रह्मबोधनिरासः कृतः परत्वगुणस्य मूर्त्तेष्वेव सत्त्वेन ब्रह्मणो मूर्त्तत्वा-

भावेन च तस्य तदनाश्रयत्वात् । अतएव परस्यामिति सार्थकम्, अस्य विवरणपरं "स य एषोऽणिमे"त्यपि केनचिन्निपुणतरेण व्याख्यातम् । न च परस्यां देवतायामिति वाक्यस्थितं देवतापदं परमब्रह्मैव बोधयितुं प्रभवति तत्पदात् कथं परमाणुबोध इति वाच्यं, परमब्रह्मणि सुमनस्त्वादि-पुस्त्वादि-रूपदेवगतासाधारण-धर्म्मबाधेऽपि निर्ज्जरत्वामरत्वादिरूपसामान्यधर्म्ममादायापि यदि परमब्रह्मणो देवत्वेन व्यवहारः प्रामाणिकस्तदा परमाणुष्वपि कथं नैव प्रामाणिको भवेत्, दर्शितधर्म्मयोस्तेष्वपि जागरूकत्वात् । अतएव श्रूयते च आपो देवता पृथिवी देवताऽग्निर्देवतेत्यादिक-मपि । न च परमाणुष्वनलत्वं नास्ति कुतोऽग्निशब्देन परमाणु-र्लभ्यते इति वाच्यं, भूमिरापोऽनलो वायुरिति भगवद्वाक्येन तत्रा-प्यनलत्वलाभात् । अत्र देवतापदं ब्रह्मतात्पर्य्यकं किंवा परमाणु-तात्पर्य्यकमिति संशयो हृत्तस्तन्निरासार्थमेव स य एषोऽणिमेत्युक्तम् अन्यथैतदुक्तिर्वैफल्यमापद्येत प्रयोजनान्तरादृष्टेः । अणिमपदं पर-माणुपरं भावप्रत्ययस्याऽविवक्षितत्वात् चिन्तामणिकृद्गङ्गेशोपा-ध्यायोक्तपक्षधर्म्मतांशघटकतल्प्रत्ययवत् । इत्थं नो चेत् अद्वैत-वादिमतेऽप्यगतिः स्यात्,एतावतेत्येवायातं परमाणुष्वेव द्व्यणुकानां ध्वंसस्थितिः पर्य्यवसिता, एवञ्च यत्र यद्ध्वंसो वर्त्तते तद्वस्तु तत्-कार्य्योपादानकारणमिति नियमस्थितेस्तत्वेव सिद्धमुपादानकारण-त्वम्, अचेतनाधिष्ठातृतयात्मनो जगत्कर्त्तृत्वरूपकारणत्वञ्च सुस्पष्ट-माह ऐतदात्म्यमिदं सर्व्वमिति । अस्यार्थः ऐतदमात्म्यञ्च एतत्पदस्य प्रक्रान्तसविधवाचितायां औत्सर्गिकतयैतत्पदेनाणिमैव प्रतिपाद्यते । अतिव्यवहितसत्पदार्थब्रह्मवाचित्वे स आत्मेतिवाक्ये तत्पदप्रयोगव-दत्रापि सर्व्वनामतत्पदप्रयोगापत्तेः । अतएव "नमस्तस्मै कस्मै-

चिदमितमहिम्ने पुरभिदे," "तस्मै नमः कृष्णाये"त्यादौ तत्पदस्थले इदम्पदैतत्पदप्रयोगो न भवितुमर्हतीत्येवौत्सर्गिकी रीतिः। एतत्पदार्थ आत्मविशेषणं तादृशार्थबोधकैतदात्मपदोत्तरयण्प्रत्ययस्तथा चैतदात्मजन्यं जगदिति कश्चिद्व्याकरोति तन्न समीचीनम्, एतज्जन्यमात्मजन्यमित्यर्थबोधेनैव सामञ्जस्यसम्भवे पदद्वयस्यैकतरवैयर्थ्यात्।

जगत् सत्यं किंवा मिथ्येत्याशङ्कानिराकरणार्थं तत्सत्यमिति। अत्र सत्यत्वं प्रमाकारत्वं, मिथ्यात्वञ्च भ्रमाकारत्वं, छान्दोग्योपनिषद्वाक्यान्तरमपि परमाण्वाद्युपादानकवस्तुष्वपि सत्यतां प्रमापयति। ताश्च उपनिषदो यथा "मृत्तिकेत्येव सत्य"मिति, "लोहमित्येव सत्य"मिति,"कार्ष्णायसमित्येव सत्य"मिति, "त्रीणि रूपाणीत्येव सत्य"मिति च। एतावता ब्रह्मैव सत्यं जगन्मिथ्या इत्येव किमायातम्? तत्पदं हेतुपञ्चम्यन्ताव्ययम्। अस्य पर्य्यवसितार्थस्तु यस्मात् जन्यद्रव्यमात्रस्यैव मूलीभूतोपादानकारणानि परमाणवः सत्यानि कर्त्तापि सत्यं तस्मात् तत्कार्य्यं सर्व्वमपि सत्यम्, यत्कार्य्योपादानकारणादेः सत्यत्वं तत्कार्य्यस्यापि सत्यत्वमिति नियमात्। अतएव भगवद्गीता"नासतो विद्यते भावो नाऽभावो विद्यते सतः"। एतद्भावार्थस्तु शून्याद्घटपटादिरूपभावपदार्थो न जायते, एतेन शून्यवादिमतनिरासः कृतः। नाऽभावो विद्यते सत इत्यंशभावार्थस्तु सतो ब्रह्मपरमाण्वादितोऽसत् अर्थात् व्यावहारिकप्रातिभासिकस्वप्नादिरूपमिथ्या न जायते, एतेनाद्वैतवादिमतनिरासः कृतः। तत्सत्यमित्यंशेन जन्यमात्रस्यैव सत्यत्वप्रतिपादनात् मृत्तिकेत्येव सत्यमित्यादिना नानाविधजन्यानां सत्यत्वकथनमपि साधु सङ्गतम्। आत्मपदस्य परमात्मानन्तजीवात्मनां शक्त्या

बोधकतया सर्व्वकर्त्तृत्वं जीवे वा परमात्मनि वर्त्तते इतिसंशयापनोदनार्थं स आत्मेत्युक्तम् । अत्र तत्पदं "सदेव सौम्येद"मिति वाक्यस्थितसर्व्वपदार्थस्योपक्रान्तस्य वाचकं तावतोक्तसंशयनिवृत्तेः, अन्यथा निरुक्तवाक्येनैतदात्मजन्यत्वलाभे स आत्मेत्यंशप्रदर्शनव्यर्थत्वापत्तेः ।

अथैतदादिसर्व्वनामपदोत्तरम् आदिमस्थितादेज्घटितनाम्नोत्तरञ्च विशेषविध्यप्राप्तटणादिप्रत्ययोऽसाधुरेव तद्बाधकस्य तद्धितेयप्रत्ययविधेः सत्त्वादत एतदीयमात्मीयमिति प्रयोग एव भवितुमर्हति नत्वैतदमात्म्यमिति प्रयोगोऽपि इति चेन्न, अपवादविषये क्वचिदप्युत्सर्गोऽभिनिविशत इति शाब्दिकानामुक्तेस्तस्येदमिति सूत्रप्राप्तत्वेन बहुलं छन्दसीति सूत्रबलेन वा टण्प्रत्ययान्तस्य साधुत्वसम्भवात्, आर्षत्वरूपबलप्रयुक्तपदसाधुतावत् । आर्षोक्तिर्यथा, निशामय तदुत्पत्तिं, असूनिव विचिन्वति, गृह्ण देवीत्यादि । एतदात्मपदोत्तरं यण्प्रत्ययस्वीकारे स आत्मेति प्रदर्शनस्य व्यर्थतापत्तेः प्रदर्शितत्वात् ।

अथवा एतत्सहित आत्मेति विग्रहलभ्यार्थतात्पर्य्यको मध्यपदलोपी समासएव, एतेन परमाणुचयं सहकृत्यैव परमेश्वरः सृष्टिं करोति नतु तमसहायीकृत्य किमपि भूतं सृजतीति परमाणूनामुपादानपरमाणोरसत्त्वान्न तत्रात्मसृष्टत्वमित्यपि सूचितम्, न च सहितरूपमध्यपदलोपी समासो न कस्यापि व्युत्पन्नस्य सम्मत इति वाच्यं, विश्वविख्यातप्रसिद्धन्यायनिबन्धकार-शब्दशास्त्रपारगामि-जगदीशतर्कालङ्कारेण शब्दशक्तिप्रकाशिकायां तत्समासस्य स्वहस्तितत्वात्, यथा विदिभिदिच्छिदेः कुरचिति सूत्रस्थितं विदिभिदिच्छिदिपदं विदिभिदिसहितच्छिदिरिति विग्रहार्थतात्पर्य्यकः

समासएव अन्यथा तत्समासस्य पुंलिङ्गत्वं तदुत्तरमेकवचनञ्च न स्यात् स्याच्च तस्य क्लीवत्वमेकवचनान्तत्वञ्च इति तत्कृतग्रन्थमर्मार्थः। अथ सूत्रमहिम्नैव समाहारद्वन्द्वस्य पुंलिङ्गत्वं इतरेतरद्वन्द्वेत् तदुत्तरमेकवचनं भवितुमर्हति सूत्रे लिङ्गवचनमतन्त्रमिति प्रवादसत्त्वात् एवञ्च जगदीशेनोक्तप्रयासः कथं कृत इति विज्ञातुं न वयं प्रभवाम इति वाच्यं, मध्यपदलोपिसमासस्य अनुशासनलब्धतया तेनैवोपपत्तिसम्भवे सूत्रत्वादिमात्रं सहायीकृत्योपपत्तिकरणस्य दूरदर्शिनां द्वेष्यत्वात् तत्र केवलशाब्दिकानामद्वैतवादिनाञ्च शोभतामलमतिविस्तरेण।

अद्वैतवादिनामद्वैतवादरक्षणे दृढ़प्रतिज्ञतामालोक्य विस्मयापन्नानामस्माकं श्लोक एकः स्मृतिपथमारोहति—

चिपिटं कोमलत्वाय वरं सिञ्चामि मूत्रकैः।

स्थापयिष्यामि नो पादौ तड़ागादौ तथाप्यहम्॥

विशेष्यविधया वा विशेषणविधया तादात्म्यसम्बन्धेन प्रमात्मकान्वयबोधतात्पर्य्येण प्रयुक्तानां तदेतत्सर्व्वविश्वकिमादिरूपसर्व्वनाम्नां सर्व्वेनैव विशेष्यस्य वा विशेषणस्य बोधकाजहल्लिङ्गपदलिङ्गभाजित्वनियमः। यत्र त्वभेदारोपः शास्त्रकाराभिमतस्तत्र प्रतिपाद्यपुरुषाणां प्रमापार्थक्यसंवेदनस्वरूपप्रयोजनकतयोक्तसर्व्वनामोत्तरं सामान्यत्वान्नपुंसकमित्यनुशिष्टिमवलम्ब्य क्लीवलिङ्गव्यञ्जकविभक्तिरेव प्रयुज्यते शास्त्रकारैः। सर्व्वः पदार्थः सर्व्वे वा पदार्था इति लोकतः, शास्त्रतश्चैतदात्मामिदं सर्व्वं स आत्मेत्यादि। अत्र च पुंलिङ्गात्मपदसामानाधिकरण्येन साकाङ्क्षसर्व्वनामतत्पदस्य पुंलिङ्गता। आरोपस्थलन्तु "तत्त्वमसि श्वेतकेतो," "वासुदेवः सर्व्वमिति," "त्वत्तः सर्व्वं त्वं हि सर्व्वं स्मरारे," "तत्

किं शस्त्रं नास्य तस्त्वां नतोऽस्मि" इत्यादौ सर्व्वत्र युष्मच्छब्दवासु-देवशब्दयोः पुंलिङ्गत्वेऽपि तच्छब्दार्थाभेदान्वयतात्पर्य्येण प्रयुक्त-तत्पदसर्व्वपदयत्पदेभ्यः क्लीवलिङ्गव्यञ्जकविभक्तिरेव प्रयुक्ता। जीवेषु ब्रह्माभेदस्य "इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः," "परमं साम्यमुपैति," "परमं ब्रह्म वेद," "ब्रह्मैव भवति," इत्यादि-सुस्पष्टबहुप्रमाणबाधितस्य सर्व्वभूतेषु तदभेदस्य तु कात्स्न्र्यप्रसक्तिर्नि-रवयवत्वशब्दकोपो वेति व्यासकृतब्रह्मसूत्रप्रतिपादिततर्कबाधितस्य "भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा" इत्युपक्रम्य, "मयाध्यक्षेण प्रकृतिः सूयते सचराचरं," "प्रकृतिं यान्ति मामिकाम्," "अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत। अव्यक्तनिधनान्येव" इत्याद्युक्तवतो भगवतोऽभिप्रायविरुद्धस्य चाद्दार्य्यबोधजनकतया तत्पदेभ्यः क्लीवलिङ्ग-सूचिका विभक्तिः साधु सङ्गता।

यत्तु "भूमिरापोऽनलो वायु"रिति "स य एषोऽणिमे"ति च प्रमाणवाक्यमनाद्यनुभवापन्नपदार्थबोधकमपि न द्वैतं साधयति अनाद्यसीमाविद्यावच्छिन्नब्रह्मणि जीवत्वव्यवहारवत् तद्विधानन्ता-विद्यावच्छिन्ने तस्मिन्नेव परमाणुत्वव्यवहारो निराबाध एव, अविद्याविशेषा एव च भूमित्वादिरूपेण व्यवहारनिर्व्वाहकाः, ब्रह्मण एवाणुत्वबोधकमुपनिषद्वाक्यमपि "अणोरणीयान्" इत्यादि, अतः सर्व्वसमञ्जसमद्वैतवादिसमाधानम्। तत्तुच्छं जीवकैवल्य-प्रयोजकतया तत्त्वज्ञानवाराणसीमरणादेः शास्त्रप्रसक्तत्वेन तन्मते जीवगताविद्यानाशस्यार्थवशसम्पन्नत्वेऽपि परमाणुत्वनिर्व्वाहिका-णामनाद्यविद्यानां नाशासम्भवेन तासां नित्यत्वापत्तेर्वस्तुसत्त्वात्, द्वैतापत्तावद्वैतसिद्धान्तभङ्गः, तन्नाशसिद्धये बलवदनुमानं न

दृश्यते । परन्तु लाघवज्ञानरूपतर्कबलेन तासां नित्यत्वकल्पनमेव साधीयः । एवञ्चानन्ताविद्यास्थले तत्समसंख्यकानि "भूमिरापोऽनलो वायु"रिति भगवद्वाक्यलब्धप्रकृतिशब्दपरिभाषितपरमाण्वात्मकनित्यद्रव्याणि कल्पयित्वा "अजामेकां लोहितशुक्लकृष्णाम्" इति श्रुत्या बोधितगुणत्रयस्य द्रव्याश्रितत्वं निर्णीय क्रियारूपादीनां द्रव्यमात्राश्रितत्वमिति चिरप्रवादानुगमनं किं न युक्तिपथमारोहति ? अपिच "भिन्ना प्रकृतिरष्टधा" इति वाक्यस्थितं भिन्ना अष्टधेतिपदप्रयोगसार्थक्यं परमाणूनां ब्रह्माभेदपक्षे कथं भवेत् ? तन्मतेऽष्टधेत्यनेनैव सामञ्जस्यसम्भवात् । निखिलभूतेषु ब्रह्मभेदसाधकतर्कप्रतिपादकव्याससूत्रस्य तद्भेदप्रतिपादकासद्वेतिमहावाक्यस्य च दर्शितत्वात् ।

अथ "अणोरणीयान्" इति दर्शितप्रमाणस्य का गतिरिति चेत्, तदंशात् परं महतो महीयानित्यपि प्रयोगोऽस्तीति किं तद्वाक्यस्य ब्रह्मस्तुतिपरत्वं नायातम् एकत्र परमाणुत्वपरममहत्त्वयोर्बाधितत्वात् क्षुद्रतरकर्णविवरावच्छिन्नत्वेऽपि "गगनं क्षुद्रतरम्" इति प्रयोगाभावात्, अन्यथा तन्मते माध्यमिकमहतां माध्यमिकाणूनाञ्च का गतिर्भवेत् ? एवं "मासानां मार्गशीर्षोऽस्मि ऋतूनां कुसुमाकरः," "द्वन्द्वः सामासिकस्य च" इत्यादि परमेश्वरश्रीकृष्णोक्तिं दृष्ट्वा पौषाद्येकादशमासानां वर्षादिपञ्चऋतूनाम् अव्ययीभावादिपञ्चसमासानाञ्च कां गतिं पश्यामि । तस्मात् स्तुत्युत्कर्षपरतयोपपत्तौ अर्थवादानां प्रमाणान्तरापरिशोधितार्थतत्त्वावधारकत्वं मीमांसकैर्न स्वीक्रियते । अद्वैतवादिमते उक्तवाक्यानां भाववर्णनं न भवितुमर्हत्येवं न ब्रह्मविष्णुमहेश्वरवद्द्वन्द्वसमासो विशुद्धमायावच्छिन्नं ब्रह्म सुतरां तदुपासनया जीवाः स्वर्गं

लभन्ते, अपरसमासास्तु कीटपतङ्गादिवत् अविद्यक्षमोहावच्छिन्न-ब्रह्मस्वरूपाः इत्युक्तविशेषवाक्यानां सप्रयोजनकत्वमव्याहतमेव

अपिच पुरुषसूक्तमन्त्रान्तर्गत"ब्राह्मणोऽस्य मुखमासी"दित्यादि-"पद्भ्यां शूद्रोऽजायते"त्यन्तमन्त्रस्थितषष्ठ्यन्तेदंपदार्थस्य मुखादावन्वय-दर्शनेन ब्रह्मणा सार्द्धं मुखादीनां भेदसत्त्वमेवावधार्य्यते न त्वभेदः। तथा सति प्रथमान्तेदंशब्दप्रयोगः स्यात्; एवञ्च न निखिल-जन्यानि ब्रह्मोपादानकब्रह्माभिन्नानि इति वेदसिद्धान्तः। न च स्वाभिन्नोपादानककार्य्यस्थले उपादानबोधकपदोत्तरं षष्ठ्यपि साधीयसी, अतएव सुवर्णस्य कुण्डलं रौप्यस्य वलयं मृत्तिकाया घट इत्यादिवाक्यानां प्रामाण्यं सर्व्वानुमतमेवेति वाच्यं, स्वार्था-न्वयितावच्छेदकावच्छिन्न-धर्म्यन्तरव्यावर्त्तकोपादान-परपदोत्तरमेव षष्ठीप्रयोगस्य साधुत्वदर्शनेन अव्यावर्त्तकपरपदोत्तरं तादात्म्य-बोधकषष्ठीप्रयोगस्याऽसाधुत्वे निर्व्विवादत्वात्; अन्यथा सुवर्णस्य कुण्डलं मृत्तिकाया घट इत्यादिवत्पदार्थस्य कुण्डलं वाच्यस्य घट इत्यादिप्रयोगापत्तेर्दुर्व्वारता स्यात्। तस्मात् परेषां मते ब्रह्मणः सर्व्वेषामेवोपादानत्वेन अव्यावर्त्तकतया मुखादौ तादात्म्यार्थक-षष्ठ्यन्तेदंपदार्थस्य ब्रह्मणोऽन्वयः कथमपि न भवितुमर्हति, परन्तु ब्राह्मण इदंमुखमासीदित्येव प्रयोगः स्यात्। न च नैयायिक-लिखितप्रमेयधूमः प्रमेयदण्डवानित्यादिवदव्यावर्त्तकपरपदघटित-वाक्यस्यापि तादात्म्यस्मारकताया आवश्यकत्वमिति वाच्यं, प्रमेय-धूम इत्यादिवाक्यानां सप्तमीतत्पुरुषसमासत्वस्वीकारेणैव उपपत्ति-सम्भवात् प्रमेयस्य धूम इत्यादिप्रयोगस्तु तैरपि न स्वीक्रियते। राहोः शिर इत्यादिप्रयोगस्तु भवत्येव षष्ठ्यन्तराहुपदार्थस्य शिरो-ऽन्तरव्यावर्त्तकत्वात्, मृत्तिकाया घट इत्यादिप्रयोगो द्वैताद्वैत-

वादिभिः सर्व्वैरेव स्वीक्रियते अतस्तत्र विवादलेशोऽपि नास्ति। सुवर्णस्य ब्रह्मणश्च कुण्डलं मृत्तिकाया ब्रह्मणश्च घट इत्यादिप्रयुक्तिरभियुक्ततरैः स्वीक्रियते न वेति विज्ञातुं न प्रभवामः। न चाप्यावर्त्तकतया ब्रह्मपदोत्तरं तादात्म्यबोधकषष्ठीप्रयोगस्याऽसाधुत्वेऽपि तत्रोपादानत्वं निखिलभूताभिन्नत्वञ्च वेदबोधितं कथं न स्यास्यतीति वाच्यं, सकलप्रमाणेभ्यो बलवत्प्रमाणीभूतदर्शितमन्त्रस्थितषष्ठीप्रयोगमहिम्ना भूतेषु ब्रह्मभेदसिद्धौ विवादलेशस्याऽप्यसम्भवात् "सर्व्वं खल्विदं ब्रह्मे"त्यादिवाक्यस्य पारमार्थिकाभेदबोधकतायाः खण्डितत्वाच्च।

वस्तुतस्तादात्म्यारोपस्थले विशेष्यविशेषणवाचकपदयोर्व्विरुद्धलिङ्गत्वेऽपि समानविभक्तिकत्वावश्यकत्वेऽपि च वचनस्य लिङ्गस्य वा न समानत्वनियमः। तथानियमस्वीकारे अयं न द्वाविदं न महान् इदं नारी पुमांश्च न इत्यादि नञ्घटितवाक्यानां निराकाङ्क्षत्वापत्तिः। नञ्रहितवाक्यानां यत्र साकाङ्क्षता भवेत् नञ्सहिततादृशवाक्यानामेव साकाङ्क्षत्वमिति सर्व्ववादिसिद्धनियमात्। एवञ्च नञ्रहितमयं द्वावितिवाक्यमिदं महानिति वाक्यञ्च तादात्म्यारोपात्मकबोधेऽवश्यं साकाङ्क्षतया स्वीकर्त्तव्यम्। अन्यथा नञ्घटितदर्शितवाक्यादेः प्रामाण्यापलापः स्यात्, अतो जहल्लिङ्गसर्व्वपदतदादिपदान्युपनिषत्स्थितानि तादात्म्यसम्बन्धेनान्वयबोधतात्पर्य्यकाणि लिङ्गवैपरीत्येन प्रयुक्तानि तादात्म्यारोपपराण्येवेत्यवधार्य्यते। क्वचिन्महावाक्ये तादात्म्यप्रमातात्पर्य्येणापि लिङ्गवैपरीत्यमस्तीति दृश्यते "सीतायाः पतये नम"इत्यादिर्वदगत्या महाजनोक्तिरूपोपायमाश्रित्य तदुपपादनीयम्। न च घटो घटभिन्नो न इत्यादिवाक्यस्य प्रामाण्यदर्शनेन नञ्घटितवाक्यस्थले

यन्नियमः प्रदर्शितः स च भ्रान्तिमूलक एवेति वाच्यम्, घटो घट-भिन्न इति वाक्यस्य घटो घटभिन्न इत्याकारकाहार्य्यशाब्दबोधे साकाङ्क्षत्वात्। न चाहार्य्यशाब्दबोधोऽप्रामाणिक आहार्य्य-प्रत्यक्षस्यैव बहुसम्मतत्वात् इति वाच्यम्, गुणधनम् इत्यादिप्रयोग-स्यानुशिष्टिप्राप्तत्वात्, आहार्य्यशाब्दबोधं विना स्तुतिवादाद्यात्मक-ऋष्याद्युक्तार्थवादानां यूपकाष्ठे इन्द्राभेदभावनाविध्युत्थापकेन्द्रो यूप-इत्यादिश्रौतार्थवादानाञ्च गत्यन्तराभावाच्च। इत्यञ्च परमाणु-ष्वेव जगदुपादानत्वं ब्रह्मानात्मकत्वञ्चेति यत्तार्किकमतं तदेव शास्त्रसिद्धं भूतेषु ब्रह्मोपादानकत्वे वर्णितप्रकृतिरूपभूमिप्रभृतिषु उपादानकारणत्वरूपप्रसवहेतुत्वप्रदर्शनं विरुध्येत। अहं सूये इत्यनभिधाय "प्रकृतिः सूयते" इति कथनं, मदभिन्ना प्रकृतिरित्य-नभिधाय "मयाध्यक्षेण प्रकृति"रिति कथनं, मां यान्तीत्यनभिधाय "प्रकृतिं यान्ति मामिका"मिति कथनञ्चोन्मत्तप्रलपितं स्यात्।

न च तत्र प्रकृतिशब्दो व्यावहारिक एव न तु पारमार्थिको ब्रह्मभिन्नपदार्थस्यालोकत्वादिति वाच्यम्, भिन्नाः प्रकृतिरष्टधा इति पदद्वयस्य सार्थक्याय प्रकृतिषु ब्रह्मणः पारमार्थिकभेदस्य पृथिवीत्यादीनान्तु परस्परभेदस्य च सुस्पष्टप्रतीयमानत्वात्। अन्य-थाष्टधेत्यंशेनैव चरितार्थतासम्भवेन दर्शितपदद्वयोत्कीर्त्तनं व्यर्थं स्यात्।

न च तत्त्वमसीतिवाक्यमभेदान्वयपारमार्थिकबोधपरमेव तत्र तत्पदन्तु न सर्व्वनामात्मकं परन्तु ॐ तत्सदिति निर्द्देशो ब्रह्मणः स्त्रिविधः स्मृत इति महावाक्यलब्धपरमब्रह्मपर्य्याय एव, स-प्तम्येत्यत्र तत्पदञ्च सर्व्वनामैवेति न कश्चिद्विरोध इति वाच्यम्, उपक्रमात्तात्पर्य्यकतयोपपत्तौ ब्रह्मतात्पर्य्यकशब्दान्तरस्य वाक्य-

मध्ये प्रक्षेपस्य स्वतन्त्रतामात्रपरिचायकत्वात्, एवं स आत्मेत्यत्र ब्रह्मबोधकतच्छब्दः कथं परित्यक्तः। उक्तवाक्यं नाभेदभावनापरं किन्तु पारमार्थिकाभेदबोधपरतया जीवतत्त्वनिर्णायकमेवेति तद्वाक्यस्योपवर्णनं केनचित् कृतं तन्न सङ्गतं मम साधर्म्यमागता इत्यादिदर्शितहेतोर्जागरूकत्वात् तत्सर्व्वजीव इत्युक्तेरावश्यकत्वापत्तेश्च।

इदमप्यतीव रहस्यं तत्त्वमसीतिवाक्यस्य श्वेतकेतौ ब्रह्मस्वरूपताबोधकत्वमद्वैतवादिनः स्वीकुर्व्वन्तु तावता सकलजीवेषु परमेश्वरस्वरूपतां केनोपायेन तेऽवधारयिष्यन्ति। हे देवदत्त त्वं साधुरसीतिवाक्यं श्रुत्वा किं सर्व्वशरीरिणां साधुत्वं निर्णीयते। यथैकत्र दृष्टः शास्त्रार्थो बाधकं विनान्यत्रापि तथा कल्प्यते इति न्यायात्सर्व्वजीवेषु ब्रह्मस्वरूपत्वं कल्पयितुं शक्यते साधुत्वस्य च दस्युप्रभृतिजीवेषु बाधितत्वेन न तेषु साधुस्वरूपता सिध्यतीति चेत् चिरनिरन्तरवेदसेवया तपस्यया च शमदमसर्व्वभूतसमबोधप्राप्तश्वेतकेतोरवतारादिवत् ब्रह्मगतबहुगुणवत्त्वेनास्तु तस्मिन् ब्रह्मस्वरूपत्वं, शूकरसुरापदस्युप्रभृतिषु कं गुणं दृष्ट्वैकत्र दृष्ट इति न्यायमवलम्ब्य तेषु ब्रह्मस्वरूपत्वं कल्पयथ। अथ लाघवरूपयुक्तिमवलम्ब्यैव सकलजीवेषु ब्रह्मस्वरूपत्वं कल्प्यते इति चेन्मन्त्रपाठं परित्यज्याद्वैतवादिनां युक्त्युद्भावने प्रयासो जायते इति विदित्वा सन्तोषरसमास्वादयामः। वस्तुतो लाघवरूपयुक्तिरपि यावतां जीवानाम् ऐक्यपर्य्यवसायिनीं ब्रह्मस्वरूपतां साधयितुं न प्रभवति। तथा सति एकेन मरणान्ताख्यप्रायश्चित्ते कृते सति। अशेषं कल्मषं तस्मान्नश्येत् सर्व्ववपुष्मताम्। सामान्यतः पापनाशं प्रति समवायसम्बन्धेन प्रायश्चित्तस्य लाघवेन हेतुत्वात्। अथ

जीवतानिर्व्वाहकासंख्यानाद्यविद्या तदवच्छेदेन पापं पापनाशः प्रायश्चित्तञ्च कल्पयानीति सर्व्वसमञ्जसमिति चेदेवंविधाविद्या-कल्पनायां मण्डूकमण्डलीनां प्रकाण्डविषधरधारणचेष्टायाः समानत्वात् प्रायश्चित्तपापनाशानामनन्तकार्य्यकारणभावप्रसङ्गाच्च।

परे तु तत्त्वमसि श्वेतकेतो इत्यत्र तदितिपदं हेतुपञ्चम्यन्ताव्ययम् असीत्यत्र धात्वर्थः शरीरसम्बन्धः। तत्समुदायवाक्यार्थस्तु प्रकृष्टयत्नवत्परमेश्वरादेव त्वं शरीरसम्बन्धादिरूपकार्य्यवान् न तु तव यत्नः स्नानपानभोजनादिकं सम्पाद्य स्वात्मनि प्राणशरीरादिसम्बन्धं स्थापयति। यतो जीवानां यत्नः स्वातन्त्रेण कामपि क्रियां साधयितुं न प्रभवति। एतदेव बलवत्प्रमाणेनावगम्यते। प्रमाणं यथा "कर्त्ता कारयिता शम्भु"रिति, "प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः। अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते॥" इति वाक्यञ्च ; प्रकृतेरितिविभक्त्यर्थः प्रयोज्यत्वं भगवद्वाक्यत्वेन तृतीयार्थे षष्ठी पञ्चमी वा। एतद्वाक्यविवृतार्थोऽग्रे वक्ष्यते। एवञ्च सर्व्वभूतकर्त्तृत्वेनैव स्वात्मगतशरीरादिसम्बन्धकर्त्तृत्वेनापि परमेश्वरं भावयेत्युपदेशे दर्शितवाक्यस्य तात्पर्य्यम्। न चैतदात्म्यमिदं सर्व्वमिति प्रागुक्तवाक्येनैव सर्व्वान्तर्गतशरीरसम्बन्धकर्त्तृत्वेनापि परमेश्वरभावनायाः प्राप्ततया तत्त्वमसीति पुनरुक्तमिति वाच्यम्, यत ऐतदात्म्यमिदं सर्व्वमिति वाक्येन परमाण्वाद्युपादानकं यद्‌यत्कार्य्यं जायते तत्सर्व्वकर्त्तृत्वेन भगवच्चिन्तनं प्राप्तम्। एतावता सकलभूतकर्त्तृत्वमेवायातं जीवेषु शरीरादिसम्बन्धस्य तु परमाण्वाद्यजन्यत्वेन पूर्व्ववाक्यतस्तादृशसम्बन्धकर्त्तृत्वं न लब्धमतो न्यूनताभङ्गाय तत्कर्त्तृत्वमपि प्रदर्शितं परमाण्वाद्युपादेयभूतवर्गस्यैवात्मनि तदनुपादेयस्य शरीरादिविजातीयसम्बन्धस्य

कर्तृत्वेन भगवद्भावना निर्व्वाणोपयोगिनी भवेदित्युपनिषदंशद्वयेन प्रतिपादितम्। एतेनासीत्यंशप्रयोगो व्यर्थ एवम् उद्देश्यविधेयवाचकपदयोर्वैपरीत्यमित्याशङ्कापि समाहिता। न चास्धातोः शरीरसम्बन्धबोधकत्वं न दृष्टचरमिति वाच्यम्, बहु स्यामिति छान्दोग्योपनिषद्वाक्यस्थास्धातोस्तादृशार्थकत्वं विनापरस्य कस्यापि दुर्व्वचत्वात्। नित्यान्वयतात्पर्य्येण प्रयुक्ता उत्पदजनास्भूप्रभृतिधातवः प्रायशो निरुक्तार्थका एव भूपर्य्यायधातूनां मुख्यार्थभूताया उत्पत्तेर्नित्ये बाधात्। तत्तद्धातुघटितवाक्यानि यथा, "उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते।" "जातो रामः स्वयं हरिः।" "न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः। न चैवं न भविष्यामः सर्व्वे वयमतः पर"मित्यादिकानि। देहसम्बन्धस्येव क्वचिदास्धातुः कालसम्बन्धस्यापि बोधकः। यथा दिक्काली स्त इत्यादि।

न च महावाक्यस्य प्रमापरत्वेनोपपत्तौ आहार्य्यबोधजनकतायाः स्वीकारो न युक्तिसङ्गत इति वाच्यम्, बाधकसत्त्वे तत्कल्पनाया आवश्यकत्वात्, मम साधर्म्यमागतेत्यादिना बाधकस्य प्रदर्शितत्वात्। "सर्व्ववाद्यमयी घण्टा" "आपो नारायणः स्वयं" "सर्व्वतीर्थमयी गङ्गा" "शालग्रामः स्वयं हरिः" "गुरुरेव स्वयं ब्रह्म" एवम् "अहं देवोऽथ नैवेद्यं गन्धपुष्पादिकञ्च यत्। देवाधारोऽहं देवो देवं देवाय योजयेत्॥" "घट त्वं धर्म्मरूपोऽसि" इत्याद्यसंख्यार्थवादात्मकमहावाक्यानाम् आहार्य्यज्ञानतात्पर्य्येण प्रयोगदर्शनात्, अन्यथा तत्तद्वाक्यानामपि प्रमाजनकत्वं स्यात्। तस्मादर्थवादानां बाधितार्थकत्वं न क्षतिकरं विध्युत्थापकत्व-स्तुतिपरत्वादेरेव तेषां बलवत्त्वात्। अपिच तत्त्वमसीतिवाक्यस्य पार-

मार्थिकाभेदान्वयबोधपरत्वव्याख्या स्वप्नतुल्यैवेति मन्यामहे जीवेषु ब्रह्माभेदारोपस्यैव उक्तवाक्यार्थतुल्यार्थकभगवद्गीतापर्य्यालोचनया मुख्यतः प्रतीयमानत्वात्, गीता यथा "ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।" "समः सर्व्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ॥" "ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ।" अस्य भावार्थः, समः सर्व्वेषु भूतेषु अर्थात् "सर्व्वं खल्विदं ब्रह्म" "वासुदेवः सर्व्व"मित्याद्यभेदबुद्धिप्रयुक्तमित्रत्वशत्रुत्वपुत्रत्वपरापत्यत्वबुद्धिनिबन्धनविषमबुद्धिरहितः, स्वकीयात्मनि चातात्त्विकं ब्रह्मज्ञानं लब्ध्वा ब्रह्मभूतः प्रसन्नात्मा सन्, न शोचति, पुत्राद्यपायादपि नाक्षिपति, न काङ्क्षति, स्वकीयमिष्टचयं न कामयते, सर्व्वभूतेषु स्वस्मिंश्च ब्रह्माभेदबुद्धिजननात् ब्रह्मणस्तु दर्शितदोषरहितत्वात्। शोकेच्छेत्युपलक्षणम् अमानित्वादम्भित्वादिकमपि बोध्यम्। ईदृशज्ञानात् परमेश्वरे परां भक्तिं लभते इत्याह मद्भक्तिं लभते पराम्। अदम्भित्वादिगुणसम्पन्नस्यैव भगवत्कृपापात्रत्वात्, तादृशकृपाबलेनैव परमभक्तिं लभते इति भावः। तद्भक्तिबलात्तदात्मानं सृजाम्यहमित्यादिदर्शितमहावाक्यनिकरलब्धरामकृष्णादिरूपबहुविधप्राकृतावतारविधिविष्णुमहेश्वरमहाविद्यादिशरीरधारित्वरूपतत्त्वेन ज्ञानमर्थात् प्रमाज्ञानमाश्रयते तत्त्वतो ज्ञानस्यैव प्रमात्वात् परमेश्वरे परमभक्तिमात्रप्रसूतविविधशास्त्रविश्वासं तन्मर्म्मार्थज्ञानञ्च विना दर्शितप्रमायाः कथमप्यसम्भवात्, इत्याह भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः। अथ यावान् य इत्यंशेन ब्रह्मणि सकलपदार्थाभेदज्ञानमेव तत्त्वतो ज्ञानमित्येव लभ्यते, अतएव सर्व्वं खल्विदं ब्रह्म इत्यादिवाक्यस्य भावनारूपोपासना विध्युत्थापकत्वे-

ऽपि तादृशी च भावना प्रमारूपैवायाता इति चेन्न, सामान्य-शब्दस्य विशेषपरतामभ्युपगम्य दर्शितबहुशरीरतात्पर्य्यकतया गीतास्थयावत्पदस्य व्याख्येयत्वात्, अद्वैतवादिमतेऽपि गीतास्थित-सर्व्वपदयावत्पदार्थस्य सङ्कोचस्यावश्यकत्वं यावदादिपदेन पदार्थ-मात्रस्यैव विवक्षणे जीवत्वेश्वरत्वादिनिर्व्वाहिकामोहमायानिरू-पणार्थं "सदसद्भ्यामनिर्व्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि यत्-किञ्चिद्भावरूपमित्युक्तवद्भिस्तैर्मोहादेर्ब्रह्मभिन्नत्वेन स्वीकृतवद्भिः सङ्कोचं विना प्रमात्वं कथमुपपादनीयम्, एवं वासुदेवः सर्व्वमितो-त्यनेन पुनरुक्ततापत्तेः। अपिच भक्तेः पूर्व्वजातं ब्रह्मभूत इत्यतो-ऽतात्त्विकं ज्ञानं लब्धं भक्त्युत्तरञ्च यावान् यश्चास्मि तत्त्वत इत्यनेन तात्त्विकज्ञानं प्रतिपाद्यते इति धन्या मीमांसा। न च ब्रह्मण एक-त्वेन तत्र यावत्पदार्थस्याभेदान्वयबोधस्तत्त्वतः कथं भवितुमर्हतीति वाच्यम्,बह्वः श्रुतयः इत्यादिवदद्वैतवादिमते बहवो जीवा इत्यादि-वच्च दर्शितशरीरेषु यावदादिपदार्थाभेदप्रमायां तात्पर्य्यात् श्रीधर-स्वामिना पुनर्यावत्पदार्थाभेदस्य विशेष्ये बाधभयेन यावत्पदस्य विश्वव्यापके लाक्षणिकत्वमेव व्यवस्थापितम्,एवञ्च तन्मतेऽपि जगति ब्रह्माभेदो बाधित इति किं नायातमन्यथा तत्कृतलाक्षणिकत्व-व्यवस्थाया उन्मत्तावधारितत्वापत्तेः। साकारत्वेन भगवद्भावना-रूपयोगे निष्पन्ने तदुत्तरं परमेश्वरस्य चिरावस्थिततत्त्वेन सर्व्वज्ञत्वा-दिना प्रमात्मकज्ञानरूपचतुर्थयोगं लब्ध्वा तदनन्तरमुपायं लभते। स चोपायः जीवतत्त्वज्ञानमित्येवाह ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरमुपायमिति शेषः। जीवतत्त्वज्ञानस्य निःश्रेयसासन्नो-पायतया भगवतैव निर्द्दिष्टत्वात्। तद्वाक्यं यथा "इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते। एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति

तद्विदः ॥ क्षेत्रज्ञञ्चापि मां विद्धि सर्व्वक्षेत्रेषु भारत । क्षेत्र-क्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥" अस्य भावार्थः—द्विवचन-निर्देशात् क्षेत्रक्षेत्रज्ञयोः पार्थक्येन ज्ञानं लभ्यते परमेश्वरधर्म्मिक-शरीरादिसर्व्वभूतकर्त्तृत्वज्ञानमर्थवशसम्पन्नं शरीरपार्थक्यज्ञानरूप-तात्त्विकज्ञानं, स्वात्मधर्म्मिकं तत्र तत्रेत्याकारकशरीरपार्थक्य-ज्ञानञ्च एतज्ज्ञानद्वयमेव ज्ञानपदवाच्यं तद्वयं मुक्तावासन्नोपाय-स्तन्मध्ये ब्रह्मणि ; सर्व्वभूतकर्त्तृत्वादिज्ञानमासन्नोपायः स्वात्मनि शरीरादिभिन्नत्वज्ञानमासन्नतरोपाय इत्यवधार्य्यते ततो मां त-त्त्वतो ज्ञात्वा विशते तदनन्तरमित्यत्र ज्ञात्वेति क्त्वाप्रत्ययदर्शनात् ज्ञात्वापदानन्तरपदयोः क्रमिकोक्तिदर्शनाच्च, अतएव तदनन्तर-मित्यंशोऽप्यर्थवान् भवति अन्यथा ज्ञात्वा इत्यनेनैव सामञ्जस्यात् तत्प्रयोगो व्यर्थः स्यात् । शुद्धज्ञानपदं मोक्षोपायज्ञानमभिधत्ते, तत्र कोषः "मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयो"रिति, एवञ्च निःश्रेयसोपायानां बहूनां प्रदर्शिकाक्रमिकोक्तिषु तदुपायप्रति-पादकपरवाक्यद्वयमध्य एव तत्त्वत इति प्रयुक्तं वासुदेवः सर्व्वमिति ब्रह्मभूतः प्रसन्नात्मेति वाक्यद्वयमध्ये तत्त्वत इति न प्रयुक्तमेता-वतैत्येव किं न सूचितम् । आदिमोपासनारूपस्य वासुदेवः सर्व्व-मिति वाक्यलब्धसर्व्वभूते ब्रह्माभेदज्ञानस्य ब्रह्मभूतः प्रसन्नात्मेति वाक्यलब्धजीवेषु ब्रह्माभेदज्ञानस्य च भ्रमत्वमेव । अन्यथा दर्शितादिमोपासनयोर्बहुपरवर्त्त्युपासनाबोधकवाक्यमध्य एव तत्त्वत इति प्रयोगो व्यर्थः स्यात् । भगवद्गीतायाः सकलोपनिषदपेक्षया बलवत्प्रमाणत्वं स्वीकृतवद्भिर्दर्शितवचनस्य मम साधर्म्यमागता इति वचनस्य चाविरोधायापर-यावदुपनिषदन्तर्गतब्रह्माभेदबोधक-वाक्यानां यथाश्रुतार्थकत्वं परित्यज्य अर्थान्तरतात्पर्य्यकत्वम् अवश्यं

स्वीकर्त्तव्यम् । परब्रह्मतत्त्वज्ञानस्य जीवब्रह्मतत्त्वज्ञानस्य च द्वयोरेव मोक्षोपायत्वं तज्ज्ञानयोः क्रमिकत्वञ्च शास्त्रान्तरमपि प्रमापयति । यथा "द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव चे"ति द्वे ब्रह्मणी वेदितव्ये इत्यंशेन दर्शितज्ञानद्वये मोक्षोपायतायाः परञ्चापरमेव चेति प्रतीकेन च तत्त्वज्ञानयोः क्रमिकतायाः प्रतिपादनात् अभिमतकर्म्मणोः पौर्व्वापर्य्यसन्देहे बाधकासत्त्वे तु शब्दक्रमस्यैव क्रमिकत्वव्यवस्थापकत्वात् । इदन्त्ववधेयं वेदेभ्योऽपरयावदुपनिषद्वाक्येभ्यः प्रत्यक्षानुमानेभ्यश्च भगवद्गीतैव बलवत्प्रमाणम्, अतस्तदन्योपनिषदादीनां यादृशतात्पर्य्यावधारणे गीताविरोधस्तादृशतात्पर्य्यं तृणवत्तुच्छीकृत्य यथाकथञ्चिदुपायमवलम्ब्य बाधितार्थकत्वे आहार्य्यज्ञानोपयोगीच्छया वा तत्तदुपनिषद्वाक्यतः शाब्दबोधः करणीयः, परन्तु तेषामप्रतारकभ्रान्तिदोषशून्योच्चारितत्वेन तद्वाक्यानां सप्रयोजनकत्वमवश्यमुपगन्तव्यमित्यस्माकं चिरसंस्कारः । भगवद्गीताव्यवस्था च ब्रह्मभूतः प्रसन्नात्मा न शोचतीत्यादि, ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरमित्यन्तवाक्यान्तर्गतब्रह्मभूतः प्रसन्नात्मेत्यंशस्य आहार्य्यबोधपरत्वमेव न तु पारमार्थिकाभेदपरत्वम् । भक्त्या मामभिजानाति इत्याद्यंशस्थित तत्त्वत इति निर्द्देशेन भक्त्युत्तरं यद्ब्रह्मज्ञानं जायते तस्यैव तात्त्विकताया भगवदभिप्रेतत्वात् ।

किञ्च जीवे ब्रह्माभेदस्य तात्त्विकता कथमपि न, हि सम्भवति तस्य तथात्वे ब्रह्माकारवृत्त्याख्यबुद्धेरेव जीवत्वस्य व्यवहारोपयोग्यविद्यानाशेनैव स्वप्रकाशात्मकविशुद्धचैतन्यस्वरूपतात्मकैवल्यपर्य्यवसानं वृत्तम् । तदुत्तरं पुनः कस्मिन् जीवे भगवद्भक्तिर्जायते तादृशभक्तिबलेन तात्त्विकज्ञानद्वयं किमाकारञ्च ; परेषां मते

भक्तिप्रभृतिजीवगतसकलधर्म्माणामेवाविद्याकार्य्यत्वात् । तदावरणाविद्यायास्तदाकारवृत्तिनाश्यत्वे परेषां कारिका यथा "बुद्धिवृत्तिचिदाभासौ द्वावपि व्याप्नुतो घटम् । तत्राज्ञानं धिया नश्येदाभासात्तु घटः स्फुरेत् ॥" इति तन्मते स्वप्रकाशात्मब्रह्मस्फूर्त्तिश्च जीवगताविद्यानाशोत्तरमेव भवेत्, तत्र च ब्रह्माभासो नोपयोगो स्वस्मिन् स्वप्रतिविम्बाभावात्, विषयान्तराणां चाक्षुषे आलोकसंयोगस्योपयोगित्वेऽप्यालोकप्रत्यक्षे आलोकसंयोगस्यानुपयोगितावत् । अद्वैतवादिनामयमितिहासआपाततो रमणीयः परन्त्वसौ भित्तिशून्यत्वात् सर्व्वेषां न श्रद्धास्पदम् ।

कश्चित्तार्किकः, "तत्त्वमसि श्वेतकेत"विति वाक्यस्य हे श्वेतकेतो त्वं ब्रह्मैवासीत्येवार्थः मम साधर्म्म्यमागता इति भगवद्गीतया "निरञ्जनः साम्यमुपैती"ति श्रुत्या ब्रह्म वेद "ब्रह्मैव भवती"तीशोपनिषद्वाक्येन च प्रतिपादितस्य जीवब्रह्मणोः पार्थक्यस्याविरोधाय तत्त्वमसीत्यत्र तत्पदस्य ब्रह्मसदृशे लक्षणाया आवश्यकत्वात्, न च जीवेषु ब्रह्माभेदबोधकबहुवाक्यसत्त्वेन साम्यपदसाधर्म्यपदयोर्ब्रह्मस्वरूपत्वे लक्षणैवोचितेति वाच्यं, यतो भ्रान्तिशून्यस्यैकस्याप्ययं देवसदृशोऽस्मिन् वा देवसादृश्यमित्यादिवाक्यं सकृच्छ्रुतवतोऽयं देव इति वाक्यस्य शतशः श्रवणेऽपि सदृशसादृश्यादिपदानां देवादिस्वरूपतत्स्वरूपत्वयोर्लक्षणया बोधकत्वं न केचन व्युत्पन्नाः स्वीकुर्व्वन्ति, सुतरां तद्बोधे तादृशवाक्यानां निराकाङ्क्षत्वं परन्तु सदृशपदरहितदेवादिपदानां देवादिसदृशे लक्षणैवोत्सर्गिकी, गौर्वाहिकः, कुलटापिशाची, सर्व्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः, इत्यादिभूरिप्रयोगदर्शनेन तत्तत्पदस्य सदृशादिबोधकतायामविवादात् । अपि च सकलोपनिषद्गूढ़मर्म्मार्थोपदिदिक्ष-

श्रीमद्भगवत्प्रणीत-सकलोपनिषत्सारसंग्रहभूत-गीतोपनिषद्वाक्यानां शक्तिलब्धार्थपरित्यागस्य यथेच्छाचारिणामेव सम्भवात् ।

सकलोपनिषत्सारसंग्रहभूत-गीतोपनिषदिति शङ्कराचार्य्येणापि लिखितम् । जीवेषु ब्रह्मसादृश्यन्तु विभुव्यापित्व नित्यत्वज्ञानवत्त्व-कृतिमत्त्वेच्छावत्त्वेभ्यः । साक्षादिष्टसाधनत्वाप्रतिपादकतया तत्त्वमसीतिवाक्यमर्थवाद एव । स चार्थवादः सुन्दरोऽहं सुखीत्याकारस्य शरीरेषु जीवत्वेन चिरभ्रमस्य निरासप्रयोजनकोबाधितार्थकएव सन् निःश्रेयसासन्नोपायीभूतस्याहं शरीरभिन्न इत्याकारक-तन्न-तन्नेतिज्ञानस्य यत्तज्ज्ञानं मतं ममेति भगवद्गीतया प्राप्तस्य महर्षिगोतमकणादसम्मतस्य च जीवतत्त्वज्ञानस्य विधिं कल्पयति, अतएव प्रतियोग्यनुयोगितयात्मैव तत्त्वतो ज्ञेय इति बौद्धाधिकारग्रन्थोऽपि । एवञ्च जीवतत्त्वज्ञानव्यवहितमोक्षोपायस्य ब्रह्मतत्त्वज्ञानस्य शास्त्रान्तरप्राप्तत्वेन तत्पारिपाट्यमप्रदर्श्य मुक्तेरासन्नोपायीभूतजीवतत्त्वज्ञानार्थं तर्कशास्त्रं प्रणीतम्, अतएव सर्व्वदर्शनेभ्यः प्राधान्यं तर्कशास्त्रस्य ।

आयुर्घृतं, पिता स्वर्गः,पिता धर्म्मः कृष्णेति मङ्गलं नाम, पुण्येऽहनि, शुभेऽहनि, इत्याद्यसंख्यवाक्यस्थानां आयुःस्वर्गधर्म्ममङ्गलपुण्यशुभादिपदानां तत्तज्जनकत्वाक्षणिकत्वस्य दृष्टतया तद्दृष्टान्तेन सर्व्वं खल्विदं ब्रह्मेत्यत्र सर्व्वपदस्य तज्जनकत्वाक्षणिकत्वं वा शक्यार्थकत्वं वेत्याशङ्कानिवृत्तये तज्जलानितीति विवृतिः प्रदर्शिता * । एतदुपनिषद्वाक्येन ब्रह्मणि लक्ष्यार्थीभूतसर्व्वजनकत्वस्यैव प्रतिपादिततया "ऐतदात्म्यमिदं सर्व्व"मिति छान्दो-

---

* इत्यस्य व्याख्या अत्रैव ग्रन्थे स्थानान्तरे द्रष्टव्या ।

स्योपनिषदंशेन तस्यैव प्रतिपादिततया च "वासुदेवः सर्व्व"मिति "यावान् यश्चास्मि तत्त्वत" इत्यादिवाक्यस्थितसर्व्वपदयावत्पदयोर्जनकलाक्षणिकत्वमेव न च विवरणसत्त्वात् सर्व्वं खल्विदं ब्रह्मेतिवाक्यस्थितसर्व्वपदं लाक्षणिकमस्तु, विवृतिशून्यवाक्यस्थितसर्व्वपदादेर्लक्षणा न युक्ता शक्यार्थेनोपपत्तौ तस्या अन्याय्यत्वादिति वाच्यं,"सम्भवत्येकवाक्यत्वे वाक्यभेदो न चेष्यते" इति मीमांसकोक्तेः, "एकत्र दृष्टः शास्त्रार्थो बाधकं विना अन्यत्रापि तथा कल्प्यते" इति व्यवस्थातश्च विवृतिवाक्याघटितवाक्यस्थितसर्व्वपदादेरपि आयुर्घृतमित्यादिवत् लाक्षणिकत्वस्य युक्तत्वात्। न च सर्व्वं खल्विदं ब्रह्मेत्यादि-शान्त उपासीतेत्यन्तवाक्येन ब्रह्माभेदप्रमाभावना सृष्टिस्थितिप्रलयकर्त्तृत्वेन तज्ज्ञानञ्च इत्युपासनाद्वयमेव प्रतिपादितं न हि तज्जलानितीत्यंशस्य विवृतिपरत्वमिति वाच्यं, तज्जलानित्युत्तरं तज्जलानितीत्युत्तरं वा चकारप्रयोगं विना दर्शितोपासनाद्वयस्य स्वरसतः प्रतिपादकत्वासम्भवात्। एवं क्रमिकोपासनातात्पर्य्यकत्वे कैवल्यकारणताया अप्रामाणिकद्वैविध्यप्रसङ्गात्, समूहालम्बनोपासनापरत्वे च गुरुशरीरावच्छिन्न-तत्कारणताप्रसङ्गात्। इदमप्यवधेयं जनकबोधकोपयोगिलक्षणाया दर्शितवेदमहर्षिवाक्यस्थबहुपदेषु दृष्टत्वेन तस्या आजानिकप्रयोगनिर्व्वाहकत्वं निर्णेतव्यम्; आजानिकत्वस्य पूर्व्वपूर्व्वप्रयुक्तत्वनियतत्वात् तादृशलक्षणा च निरूढ़नाम्नाभिलप्यते तस्यास्तु शक्तितुल्यतया तत्साहाय्येन शाब्दबोधकरणे मुख्यार्थपरित्यागनिबन्धनः कोऽपि दोषो न स्यातुमर्हति। एवं अमृतसदृशपरस्य घृतममृतमिति वेदवाक्यस्यामृतपदस्य लक्षधेनुदानजन्यपुण्यतुल्यपरस्य "गवामर्द्धप्रसूतानां लक्षं दत्त्वा तु यत्फलम्। तत्फलं

लभते वीरे”त्यादिवाक्यस्थिततत्पदस्य च प्रयोगदृष्ट्या प्रागुक्तबहु-परमवाक्यलौकिकवाक्यस्थितपदेषु सदृशार्थे लाक्षणिकत्वदृष्ट्या च सदृशार्थे लक्षणापि दर्शितरीत्या शक्तितुल्यैव निर्वाह्यते। एवञ्च “तत्त्वमसि श्वेतकेतो” “ब्रह्मविद्ब्रह्मैव भवती”त्यादिवाक्यसहस्र-स्थितपदानां सदृशलाक्षणिकत्वे को विवादः पदमादधातीति। तत्त्वमसीत्यत्र तत्पदं ब्रह्मैव भवतीत्यत्र ब्रह्मेतिपदञ्च ब्रह्मसदृशार्थकं शक्यार्थकं वेति संशयनिवर्त्तकं मम साधर्म्यमागता इति भगवद्वाक्यमेव। शङ्कराचार्य्यस्तु तद्वचनस्थसाधर्म्यपदं स्वरूपत्वे लाक्षणिकम् उपनिषदन्तरस्थिततत्पदसर्व्वपदादिकन्तु शक्यार्थपरमिति व्याख्यातवान् तन्न समीचीनं सादृश्यसाधर्म्यादिपदानां स्वरूपत्वे लक्षणायाः कुत्राप्यदृष्टचरत्वेन आधुनिकतल्लक्षणास्वीकारस्य तत्स्वीकर्त्तुर्यथेच्छाचारस्य परिचायकत्वात्। सम्भावयाम्येष हि विचारो मीमांसाकृतिपटीयसां विदुषां तोषकरो भवेदिति। घटपटप्रभृतिसकलवस्तुषु ब्रह्माभेदानङ्गीकर्त्तुर्यावान् यश्चास्मि तत्त्वत इति गीतांशस्थितयावत्पदस्य लक्षणामाश्रित्य यावद्व्यापक इति व्याख्यातुः श्रीधरस्वामिनो मते तु सर्व्वं खल्विदं ब्रह्मेत्यंशस्थ-सर्व्वपदं विश्वव्यापके लाक्षणिकं तज्जलानित्यंशेन च ब्रह्मतत्त्वान्तरं प्रतिपादितं न तु विवरणम्। एवञ्च विश्वव्यापकत्व-विश्वो-त्पादकत्व-तल्लयकर्त्तृत्व-तत्पालकत्वरूपधर्म्मचतुष्टयप्रकारेण शम-गुणादियुक्तो ब्रह्मोपासीतेति सर्व्वं खल्विदमित्याद्युपासीतेत्यन्तस्य निष्कर्ष इत्यवधार्य्यतामिति प्राहुः।

मुक्तिविचारः ।

निपुणतरास्तु "तत्त्वमसि श्वेतकेतु"इत्युपनिषद्वाक्यं परममुक्तितात्पर्य्यकमेव न तु जीवे ब्रह्मस्वरूपतातात्पर्य्यकं तथा सति तिङन्तासिप्रयोगस्यानावश्यकत्वापातात् । प्रत्यक्षोपजीवकत्वादनुमानं निरूप्यते इत्यादि गङ्गेशोपाध्यायप्रभृतिप्रणीतपङ्क्तिस्थितसमीपभविष्यत्कालतात्पर्य्यक-लट्-प्रत्ययवत् उक्तवाक्यघटकास्धात्त्तरं तदर्थकलट्प्रत्ययः तत्र तत्पदन्तु स्वारसिकलक्षणया ब्रह्मसदृशबोधकं गौण्या लक्षणायाः शक्तितुल्यतायाः सर्व्वसम्मतत्वात् तादृशलक्षणामाश्रित्य बहुप्रयोगस्य स्वारसिकत्वं प्राग्दर्शितं विचारितञ्च । तत्त्वमसीत्यादिवाक्यस्य पर्य्यवसितार्थस्तु हे श्वेतकेतो त्वं ब्रह्मसदृशो भविष्यसि ब्रह्मसादृश्यस्य परममुक्तिरूपताया "इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥" इत्युपनिषत्सारसङ्ग्रहभूतभगवद्गीतोपनिषद्वाक्येन प्रतिपादनात् । "सर्गेऽपि नोपजायन्ते" अस्य भावार्थस्तु दर्शितसादृश्यरूपमुक्तिलाभोत्तरं कस्मिन्नपि सृष्टिसमये जीवा न शरीरधारिणो भवन्ति, आत्मा ज्ञातव्यो न स पुनरावर्त्तते इति श्रुतेः । आवर्त्तते शरीरी भवतीति गदाधरव्याख्या । तत्रात्मपदं स इत्यंशश्च जीवात्मपरः । परमात्मतत्त्वज्ञानस्य कैवल्योपयोगित्वेऽपि जीवात्मतत्त्वज्ञानस्यासन्नतरोपायत्वेन गोतमादिभिर्व्यवस्थापनात् । दर्शितश्रुत्या च जीवेषु ब्रह्मणः पारमार्थिकभेदोऽपि सूचितः, अन्यथा ब्रह्मणो रूपकल्पना, सम्भवामि युगे युगे इति भूरिप्रमाणसत्त्वेन ब्रह्मपर्य्यवसितस्य कैवल्यप्राप्तजीवस्य युगे युगे शरीरधारित्वप्रसक्त्या न स पुनरावर्त्तते, न स पुनरावर्त्तते

सर्गेऽपि नोपजायन्ते इति वाक्यस्य बाधितार्थकत्वं स्यात् । प्रलये न व्यथन्ति च इति पूर्व्वोक्तसाधर्म्यविवरणवाक्यं प्रलये न व्यथन्तीति अदृष्टानामिति पूरयित्वा तेषां प्रकृष्टलये प्रध्वंसस्वरसेन निखिलादृष्टक्षये इति व्याख्येयं तत्त्वज्ञानोत्तरं यावददृष्टक्षये प्रमाणं यथा, "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः । क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे ॥" इति । कर्म्माणि अर्थात् अदृष्टानि प्रमाणं यथा "नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि । अवश्यमेव भोक्तव्यं कृतं कर्म्म शुभाशुभ"मिति ॥ अद्वैतवादिमते नोपजायन्ते न व्यथन्ति चेत्यत्र बहुवचनतिङ्प्रयोगो नोपपद्यते, तन्मते ब्रह्मण एकत्वेऽप्यविद्यानां बहुत्वनिबन्धनस्य बहुवचनप्रयोगस्य साधुत्वेनाविद्यानिवृत्तिरूपकैवल्ये जाते बहुवचनप्रयोगोपयोग्यविद्यानां जीवत्वस्य चासत्त्वात् । तङ्घटितवाक्यस्थलेऽपि मुख्यविशेष्यबोधकपदोत्तरं यदर्थकविभक्तिः प्रयुज्यते तदर्थकतिङ्प्रयोगस्य नियमात् मुख्यविशेष्ये बहुत्वबाधाच्च अन्यथा देवदत्तो न गच्छन्तीत्यपि प्रयोगः स्यात् । प्रलय इत्यादि समुदितार्थस्तु, दर्शितप्रलयकालीनत्वविशिष्टदुःखाभावभाजो भवन्ति, एतावतात्यन्तिकदुःखनिवृत्तिरूपमुक्तिरेव पर्य्यवसिता यावददृष्टनिवृत्त्युत्तरं मुक्तजीवस्य कदापि दुःखाजननात् ईदृशमुक्तौ श्रुतिरपि "दुःखेनात्यन्तं विमुक्तश्चरति ।" "अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः" इति । वचनस्य-व्यथन्तीति बहुवचनतिङ्सत्त्वात्, परमब्रह्मसुक्तं परमप्रयोजनं लब्धवन्त इति व्यवहारासत्त्वात् जीवा मुक्ता परमप्रयोजनं लब्धवन्तश्च इत्येव व्यवहाराच्च जीवेषु परमब्रह्मभेदः सुस्पष्टमवधार्य्यते । दुःखेनात्यन्तं विमुक्तश्चरति इति श्रुत्यात्यन्तिकदुःखनिवृत्तिर्मुक्तिरिति प्रतिपादितम् । सा च गीतयाऽदृष्टाभावविशिष्टदुःखाभाव-

रूपेति प्रतिपाद्यते । गोतमाभिमता च स्वसमानाधिकरणदुःखासमानकालीनदुःखध्वंसरूपा इति प्रभेदः । दर्शितमुक्तिद्वयमेव दुःखाभावरूपं स्वतःप्रयोजनात्मकम् । अतो मतद्वय एव फलसाम्यम् । परमते अविद्यानिवृत्तेरेव कैवल्यपदार्थत्वे न व्यवस्थेति विवरणवाक्यप्रयुक्तिर्वैफल्यमापद्येत । दुःखाभावोऽपि परमप्रयोजनं सुखतद्भोगदुःखनिवृत्तीनां स्वतःप्रयोजनताया महाधरादिस्वहस्तितत्वात् । दर्शितब्रह्मसाधर्म्यपदञ्च योगेन ब्रह्मसादृश्यबोधकं, सादृश्यञ्च तद्भिन्नत्वे सति तद्गतदुःखाभावरूपधर्मवत्त्वम् । अयञ्च विशेषो ब्रह्मणि दुःखाभाववत्त्वं सर्व्वदैव, मुक्तजीवेषु च अदृष्टशून्यत्वकालीनदुःखाभावः, पर्य्यवसितार्थस्तु अदृष्टाभावविशिष्टदुःखाभावः, वैशिष्ट्यञ्च एकात्मावच्छेदेन एककालीनत्वरूपम् । एतेन साधर्म्यपदस्य ब्रह्मस्वरूपत्वे शङ्कराचार्य्यस्य लक्षणाव्यवस्था नाभिज्ञानां सन्तोषलेशास्पदमपि इत्यास्तामिति प्राहुः ।

अथ मतविशेषे मुक्तिप्रभेदनिरूपणम् ।

अदृष्टाभाववद्दुःखविरहो गोतयोदितः ।
अविशेषा मुक्तिरेषा गोतमप्रोक्तमोक्षतः ॥
दुःखस्यात्यन्तनिर्मुक्तिं गोतमो मुक्तिमुक्तवान् ।
निवृत्तिं दुरदृष्टानां जगौ कश्चन तार्किकः ॥
नित्यानन्दस्य सम्भोगो मुक्तिर्भट्टस्य सम्मता ।
मीमांसकोक्ता दुःखानां प्रागभावानिवर्त्तनम् ॥
एकदण्डिमते मुक्तिरविद्याया विमोचनम् ।
लिङ्गविग्रहविध्वंसः सा निर्दिष्टा त्रिदण्डिना ॥

उपरागस्य महतो विरतिः सांख्यसम्मता ।
यतस्तदुपरागस्तु कूटस्थस्यैव बन्धनम् ॥

इत्यत्र "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति" "यदास्य सर्व्वमात्मैवाभूत् तत्केन कं पश्येत्" इति वाक्यस्य भावनापरत्वाभावेन तत्र सर्व्वमिति न प्रथमान्तं किन्तु "कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः । सर्व्वैरकर्म्मकैर्योगे कर्म्मत्वमुपजायते ॥" इत्यनुशासनबलेन आश्रित्येति क्रियामध्याहृत्य ज्ञानेच्छाकृतिरूपभावतात्पर्य्यकं सर्व्वपदं कर्म्मद्वितीयान्तमेव । एतद्विस्तृतविचारोऽन्यत्र मया विवृतः । सर्व्वमित्यार्षत्वादिनिबन्धनं प्रथमान्तत्वं क्लीवत्वञ्च भवतु, तावतापि न तार्किकमतविरुद्धं भवति, अस्य सर्व्वमित्यत्र षष्ठ्यर्थः स्रष्टत्वं तथा हि "ब्रह्ममात्रस्रष्टं विधिविष्णुमहेश्वरादिशरीरावच्छिन्नस्वात्मकं सर्व्वम् । तस्य शरीरधारित्वे विशेषणीभूतशरीराण्यादाय स्वस्मिन् स्रष्टत्वे च प्रमाणानि "उपासकानां कार्य्यार्थं ब्रह्मणो रूपकल्पना" "तदात्मानं सृजाम्यहं" इत्यादि बहून्येव प्रमाणानि सन्ति, विशेषणगतबहुत्वमादाय विशेष्यबहुत्वादिव्यवहाराणामद्वैतवादिमतेऽपि विवादानास्पदत्वात् । तार्किकमतेऽपि "बह्वः श्रुतय" इत्यादिवदुपपत्तिसम्भवात् । अद्वैतवादिव्याख्या च सर्व्वं अर्थात् जगत् सा न साधीयसी, तथा सत्यस्येत्यंशस्याऽव्यावर्त्तकत्वापत्तेः, कीटपतङ्गप्रभृतिसकलभूतादिषु पारमार्थिकाभेदबोधकप्रमाणाभावाच्च । उपनिषद्वाक्यानाञ्च प्रायशः समुदायस्यैव आहार्य्यशब्दपरतया ब्रह्माभेदभावनाविध्युत्थापकतया च मया स्थलान्तरे व्यवस्थापितत्वात् ।

वस्तुतस्तु यदास्य सर्व्वमात्मैवाभूदिति प्रतीकस्यार्थः सर्व्वं

भर्थात् स्वगृहीतब्रह्मविष्णुमहेश्वरप्रभृत्यप्राकृतविग्रहं, सर्व्वशब्दोऽशेषवाचक इति न हि नियमः तथा सति चान्द्रायणेन चैकेन सर्व्वपापक्षयो भवेदितिवचनस्थसर्व्वपदात् महापातकातिपातादेरपि बोधः स्यात्, अथवा सर्व्वशब्दप्रतिपाद्यं विश्वसंहारकमहेश्वरशरीरम् आत्म अर्थात् आत्मिप्य विहायेति यावत्, जगत्संहारकार्य्यं सम्पादयन् स्वकीयलीलाशरीरं परित्यजन् यदात्मैवाभूत्तदा जीवरूपापरशरीरिणः कस्याप्यसत्त्वेन सुतरामिन्द्रियासत्त्वं जन्यभूतासत्त्वञ्च। तादृशप्रलयसमये शरीरावच्छिन्नः सन् को जीवः केनेन्द्रियेण कं विषयं पश्यति। शरीरसत्त्वदशायामेव जीवात्मनां ज्ञानजननात्। "यदा द्वैतमिव भवति तदितर इतरं पश्यती"-त्यंशस्य व्याख्या। यदा ब्रह्म द्वैतमिव अर्थात् ब्रह्मविष्णुमहेश्वरविग्रहधारि सत्पारमार्थिकैकत्वेऽपि द्वैतमिव भवति। अत्रेवशब्द उत्प्रेक्षावाची पारमार्थिकद्वित्वादेर्ब्रह्मण्यसत्त्वात्। तदितर इतरं पश्यति इत्यत्र तदितरो ब्रह्मेतर इति यावत्, इतरं घटपटादिरूपं ब्रह्मातिरिक्तं पश्यति। परमेश्वरेण शरीरे परिगृहीते सत्येव जीवानां शरीराणि घटपटादिरूपविषयाश्च जायन्ते सुतरां तदानोमैवेन्द्रियिकज्ञानानि च नान्यदेति भावः। अद्वैतवादिनस्तु यदा ब्रह्मैकमपि द्वैतमिव भवति, इवशब्दो दर्शितार्थकः। तत् अर्थात् ब्रह्मैव इतरः सन् इतरं पश्यतीति व्याचक्षते,तन्न समीचीनं, अद्वैतमित्यस्य क्लीवलिङ्गत्ववदितर इतरमित्यस्यापि क्लीवलिङ्गत्वापत्तेः जगति ब्रह्मणः पारमार्थिकेतरत्वाभावेनाचापि पूर्व्ववदुत्प्रेक्षावाचीवशब्दप्रयोगापत्तेश्च। ते च यदास्य सर्व्वमात्मैवाभूत् इति वाक्यस्थयदापदोत्तरं तुकारं पूरयित्वा यदा त्वस्येति पाठं कल्पयित्वा अस्यार्थात् ब्रह्मणः सर्व्वं द्वाणुकादि पर्व्वतादिकं सर्व्वम्

त्मैवाभूत् तत् सर्व्वस्यैव ब्रह्मात्मकत्वात् प्रलये चासत्त्वादित्यादि व्याकुर्व्वन्ति, तन्न समीचीनं, जीवेषु भूतादिषु च ब्रह्माभेदस्य प्रमाणाप्रामतया दर्शितत्वात् नचानेन प्रमाणेनैवाभेदसिद्धिर्भवेदिति वाच्यं यतोऽर्थवादा बलवद्वाक्यतस्तर्कानुमानतश्चिरव्यवहारतश्चावधारितार्थानां घातका भवेयुरिति दूरदर्शिभिर्नाश्रावि न श्रूयते तथा सति वज्रसमञ्जसं स्यात्। आयुर्घृतं घृतममृतम् इत्याद्यसंख्यवाक्यं किमभेदं साधयति। तस्मात् बलवत्प्रमाणसिद्धार्थाव्याघातायार्थवादा लक्षणया शाब्दबोधतात्पर्य्येण प्रयोजनान्तरसूचकाहार्य्यशाब्दतात्पर्य्येण वोपपादनीया इति व्युत्पन्नानां सिद्धान्तः अद्वैतवादिवद् व्युत्पन्नः कोऽपि वाक्यश्रवणमात्रेण अर्थावधारणं कर्त्तुं न साहसी भवति, अतएव तुकारपूरणं प्रामादिकं तुष्यत्विति न्यायेन तुकारस्य सत्त्वे च, वस्तुतस्त्वित्यादिना प्राग्दर्शितार्थतात्पर्य्येणैव तुकारघटितवाक्यस्याप्युपपत्तिसम्भवात्।

न च पौराणिकार्थवादानां बहूनां बाधितार्थकतया आहार्य्यबोधपरत्वेऽप्युपनिषद्वाक्यानां वेदांशतया बाधितार्थकत्वोपवर्णनमत्यन्तमसङ्गतं किमधिकमतिरात्रे षोड़शिनं गृह्णाति नातिरात्रे इत्यादि वेदस्य सुव्यक्तं विरुद्धार्थकतया प्रतीयमानत्वेऽपि तद्विधविरुद्धवेदार्थानामविरोधोपपत्तये मीमांसाशास्त्रमपि भगवता प्रणीतम्, एवञ्च मीमांसया सकलवेदवाक्यस्यैवाबाधितत्वरक्षायै यतितव्यम्। अतएव वेदाः प्रमाणं स्मृतयः प्रमाणमित्यार्षवाक्येऽपि सामान्यवेदपदोक्तिरपीति बोध्यम् "अणोरणीयान् महतो महीयान्" "नान्तः प्रज्ञं न वहिः प्रज्ञम्" इत्यादिबह्वपनिषद्वाक्यस्य—कामो दाता कामः प्रतिग्रहीता इत्यादिवेदभागस्य च स्तुतिपरस्य बाधितार्थकतया स्पष्टप्रतीयमानत्वेन विधिप्रत्ययघटितस्यैव वेदस्य प्रमाणतया

महर्षिप्रभृतिमहात्मगणसम्मतत्वात्। तत्तद्वाक्यस्यैव च प्रामाण्योपपत्त्यर्थं मीमांसाशास्त्रप्रवृत्तेः। अतएव जैमिनिसूत्रम् "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्।" अस्यार्थः, आम्नायस्य इष्टसाधनकर्म्मणां कार्य्याणां वा साक्षात्प्रतिपादकत्वात् प्रामाण्यं तादृशकर्म्माप्रतिपादकतयार्थवादानां न प्रामाण्यम्। अतएव वेदान्तान्तर्गतानामप्यर्थवादानां परस्परस्य विरोधपरिहारार्थमधिकरणमालादिरूपमीमांसाग्रन्थे कुत्रापि विचारपारिपाट्यं न दृश्यते, दृश्यते च विधिनिषेधवाक्यार्थविचारपारिपाट्यम्। विधिनिषेधवाक्यानि च पुराणस्थितान्यपि वेदस्थविधिवाक्यवदेव प्रमाणानि इति सकलास्तिकानामवधारणम् अर्थवादास्तु पुराणान्तर्गतवद्वेदांशा अपि दुर्ब्बला यतः कार्य्यान्वितस्वार्थे पदानां शक्तिरिति स्वीकृतवतां गुरुप्रभृतिमीमांसकानां मते विधिप्रत्ययशून्यैः पुराणवाक्यैः सममुपनिषद्वाक्यानां को हि विशेषः, यं विशेषमादाय प्रमाणान्तरपरिशोधितार्थविरुद्धार्थिका अप्युपनिषदः प्रमाणानि भवेयुः न तु तादृशं पौराणवाक्यम् इत्यवधारयितुं दूरदर्शिनो न प्रभवेयुः, गुरुप्रभृतिमीमांसका मीमांसानभिज्ञा इति वक्तुमद्वैतवादिन एव साहसिनः सन्तु।

अपि च उपनिषत्सारसङ्ग्रहभूतभगवद्गीतायां बाधितार्थकवाक्यस्थितिध्रौव्ये अन्योपनिषद्वाक्यानां बाधितार्थकत्वस्वीकारे का भीतिः अर्थवादानामबाधितार्थकत्व इव बाधितार्थकत्वेऽपि विधिनिषेधोत्थितिरूपप्रयोजनकत्वाविशेषात् अर्थवादानां तदुत्थितेरेव मुख्यप्रयोजनत्वात्। भगवद्वाक्यं यथा—"मयैव ते निहताः पूर्व्वमेव, निमित्तमात्रं भव सव्यसाचिन्।" निहतत्वजीवित्वयोरेकदानवतिष्ठमानयोर्बोधकत्वेन बाधितार्थक एव भगवत्प्रणीतोक्तार्थवादो

यथा:कामः क्षत्रियो बन्धूनामपि जीवनावसानसमयं विदित्वा तैः सार्द्धं युध्येत इतिविधेरुत्थापकतयैव सुष्ठु सङ्गतः। सम्प्रयोजनकपरकीयाहार्य्यशाब्दबोधार्थं बाधितार्थकवाक्यप्रयुक्तवतो जगदुपकारव्रतस्य भगवतस्तावता न ह्यसर्व्वज्ञत्वं न वा प्रतारकत्वम्।

निरन्तरं लौहजशृङ्खलादिना
निबद्धदेहस्य यथा विडम्बना।
तथा परेशस्य तु मोहबन्धना-
दियं न किं मूढ़तमस्य कल्पना॥

अथ परमेश्वरपारमार्थिकज्ञानं कैवल्योपायतया गीतावाक्येन निर्द्दिष्टम्, अतः परमब्रह्मणः प्रकृततत्त्वं पातञ्जलवैशेषिकन्यायदर्शनकृतां मतमनुसरन्तो निरूपयिष्यामः। तदेकमेवाद्वितीयमित्यादि—श्रुतेरनुमानविशोधिततात्पर्य्यमविदितवतामद्वैतवादिनां परमाराध्यपरमेश्वर एव मोहमललिप्तो जन्मनिगड़प्रपीड़ितः पक्षपातप्रतारणाद्यशेषदोषदूषितः कलुषभरेण भीषणतरनरकं भुङ्क्ते, भुङ्क्ते च विट्कृमिः शूकरश्च सन् अभोज्यादिकं पिबति चापेयमित्थं कटूक्तिर्हि कण्टकक्षतशतवदशनिसङ्घाताघातवच्च ईश्वरो नास्तीति नास्तिकवाग्जनितव्यथासहस्रादपि हृदयं व्यथयतितराम्। ततस्तरां नितरामेव तेषां भाषणे विषवदुपेक्षायां प्रयत्नः।

अस्माकं मनोगतभावनिष्कर्षः। "नादेवो देवमर्च्चयेत्" "द्रव्यं देवोऽथ नैवेद्यं पुष्पगन्धादिकञ्च यत्। देवाधारो ह्ययं देवो देवं देवाय योजयेत्॥" "अहं देवो न चान्योऽस्मी"त्याद्यलक्ष्यार्थता दशोत्पन्नवाक्यवद्भावनामात्रतात्पर्य्यकाणि "सर्व्वं खल्विदं ब्रह्म" "तज्जलानिति शान्त उपासीत" "बहूनां जन्मनामन्ते ज्ञानवा

मां प्रपद्यते। वासुदेवः सर्व्वमिति स महात्मा सुदुर्लभः॥" "ब्रह्मभूतः प्रसन्नात्मा" "तत्त्वमसि श्वेतकेत"वित्यादिमहावाक्यानि अपराणि कानि च स्तुत्युक्तार्थपराणि दृष्ट्वा पदार्थ तत्त्वमित्थमेवेति-निरूपितवतामद्वैतवादिनां मीमांसारसमास्वाद्य निखिलपदार्थ-तत्त्वज्ञानरसपिपासुरस्माकं चेतो न तोषलेशमपि लभते। भावनापर-वाक्येषु प्रशंसास्तुतिपरेषु तेषु च प्रायशो बाधितार्थकत्वमित्येवानु-भूतत्वात्। अयन्तु विशेषः"सर्व्वं खल्विदं ब्रह्म"त्याद्यार्थ्यभावनोत्तरं जगत्कर्त्तृत्वादिना ब्रह्मतत्त्वज्ञानरूपं पारमार्थिकज्ञानं जायते। "सर्व्वं खल्विदं ब्रह्मे"त्युत्तरस्थित-"तज्जलानिती"त्यंशेन "ततो मां तत्त्वतो ज्ञात्वे"त्यन्त-भगवद्गीतया च तथैव प्रतिपादितत्वात्। एवम् "उपासकानां कार्य्यार्थं ब्रह्मणो रूपकल्पना।" "यदा यदा हि धर्म्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्म्मस्य तदात्मानं सृज्याम्यहम्॥" "परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे॥" इत्याद्यसंख्यमहा-वाक्यवत् "परदारोपभोगार्थं ग्रहीतुं स्वं परस्य च। तथा नरका-भुक्त्यर्थं सम्भवामि दिने दिने॥" "पिबन्त्यश्नन्ति यद्द्रव्यं शूक-रादिनरान्तकाः। गर्भस्थं तन्मलं मूत्रं भविष्यामि क्षणे क्षणे॥" इत्यादिरूपस्यैकस्यापि वचनस्य कस्मिन्नपि शास्त्रे दर्शनच्चेदद्वैत-वादिमतं तदा सप्रीतिमनसः समाश्रयिष्यामहे। अद्वैतवादिमते "सर्व्वं खल्विदं ब्रह्म" "तत्त्वमसी"त्यादिवाक्येनाकीटसकला-वतार-विधिविष्णुमहेश्वरान्त-शरीरधारिस्वस्याभोक्तृत्वस्य शश्यादिसुधा-पर्य्यन्तस्य च प्रतिपादनेऽपि पुनरप्राकृतशरीरविशेषपरिग्रहप्रति-पादनाय किमर्थं प्रागुक्तवाक्यानि भगवता प्रयुक्तान्येतद्बीजं नाव-धारयितुं प्रभवामः। न चोपास्यमूर्त्तिप्रदर्शनाय विशेषवाक्यानि

भगवता प्रयुक्तानीति वाच्यं, मत्स्यकूर्म्मपरशुरामकल्किप्रभृत्यवतार-मूर्त्तीनां "सम्भवामि युगे युगे" इति वाक्यप्रतिपादितासंख्यप्रकाशितावताराणाञ्च सर्व्वेषामनुपास्यत्वेन उपास्यपरतया तद्वाक्यचयभाववर्णनस्यासम्भवात्।

अथ ब्रह्मविचारः।

"यः सर्व्वज्ञः सर्व्वंवित्" "सर्व्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः। अनन्तशक्तिश्च विभोर्विधिज्ञाः षड़ाहुरङ्गानि महेश्वरस्य॥" इत्यादिमहावाक्येन नित्यसर्व्वविषयकज्ञत्वनादि-सर्व्वविषयकज्ञानवान् परमेश्वर इति प्रतिपादितम्। सर्व्वज्ञते-त्यादिवाक्यप्रतिपाद्यस्य परमेश्वरगतसर्व्वविषयकबोधेऽनादित्वस्याद्वैतवादिमते समोचीनत्वं कथमपि न हि सम्भवति, तन्मते विषयाकारज्ञानमात्रस्यैवाविद्याप्रभवत्वेन "सदेव सौम्येदमग्र आसी"दित्युपनिषदा प्रलयकाले ज्ञाने विषयाकारताराहित्यस्य तैरवधारितत्वेन चानादित्वासम्भवात् एवं तद्गतशक्तिर्यथातथास्तु, किन्तु तस्यां नाशाप्रतियोगित्वरूपालुप्तता कथं सम्भवेत् तन्मते ब्रह्मातिरिक्तस्य विनाशाप्रतियोगिनोऽलीकत्वात्। एवम् "अथातो ब्रह्मजिज्ञासे"ति प्रश्नस्य जगत्कर्त्तृपालयितृसंहर्त्तृप्रतिपादक"जन्माद्यस्य यत"इति व्यासप्रणीतसमाधानसूत्रेण "ज्ञोऽत एवे"ति तत्कृतसूत्रान्तरेण च ज्ञानाश्रय एव ब्रह्मपदस्य शक्तिरित्यवधार्य्यते तर्कशोधितानुमानमपि नित्यसर्व्वज्ञत्वादिनैव ब्रह्मसिद्धेविशेषोपायः परिलक्ष्यते। तर्कशोधितानुमानावधारित-ब्रह्मपरतयैवोपनिषदा-

अर्थवादा व्याख्येया इत्येव वेदकर्त्तृस्मृतिप्रणेत्रोरप्यभिप्रायः सुस्पष्टमेव प्रतीयते यतः "आत्मा वारे श्रोतव्य" इत्युक्त्वा तत्रापरितोषेण पुनर्मन्तव्य इत्युक्तं "श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभि"-रिति च। दर्शितवाक्ये प्रथमतः श्रोतव्य इत्युक्तितो ज्ञायते एकतरश्रुतेरवलम्बनं विना ब्रह्मसिद्धये तर्कादिकं नोद्भाव्यमिति सर्व्वेषामेवास्तिकाभिज्ञानां सिद्धान्तः महावाक्यविरुद्धार्थसाधक-तर्कोद्भावने दोषश्रुतेः। यथा "अहमासं पण्डितको हैतुको वेदनिन्दकः। तस्येयं फलनिष्पत्तिः शृगालत्वं मम द्विज" इत्यादि च। अतएव सर्व्वज्ञप्रायोदयनाचार्य्यचरणा अपि यावदुक्तोपपन्न-इति लिखितवन्तः, भावार्थस्तु अर्थात् वेदप्रामाविरुद्धसाधक-तर्कानुमानरूपोपपत्तिभिर्यः सिद्धो भवेत् सएव यावदुक्तः अर्थात् यावत्प्रमाणवाक्यतात्पर्य्यविषयः। अयन्तु विशेषो यत्तर्कानुमान-महिम्ना कियद्वाक्यं भाक्तेन घटितं कियच्च शक्तपदेनेति कल्पते; न तु नित्यानन्दस्वरूपं ब्रह्म, तद्बोधकस्यैकस्यापि सुस्पष्टप्रमाण-वाक्यस्यासत्त्वात् अनुमानस्यात्यन्तासम्भवाच्च। यद्यनेन सन्दिग्ध-तात्पर्य्यकपदेभ्यस्तस्य ज्ञानादिस्वरूपतावधारणं भवेत्। नचा-नन्दमयोऽभ्यासादिति व्याससूत्रेण तस्यानन्दरूपता सुस्पष्टमेव प्रतिपादितेति वाच्यम्, आनन्दपदस्य आनन्दयतीत्यर्थपरतयैवोप-पत्तिसम्भवात्, आनन्दयतीति श्रुतेः। तत्राभ्यासादित्यस्य ब्रह्मो-पासनया प्रचुरानन्दस्य अर्थात् असंख्यानन्दस्य लाभादिति भावार्थः। ब्रह्मण आनन्दस्वरूपत्वे तस्य प्राचुर्य्यस्यालीकत्वात्। अथवानन्दानां मितिः साक्षात्कारो यस्मादिति बहुव्रीहिसमासो-ऽपादानवाच्येऽप्प्रत्ययान्तं वा अतएव मय इत्यंशस्य न निष्प्रयो-जनकत्वम् अन्यथा आनन्द एतावन्मात्रेणैव सामञ्जस्यं स्यात्।

किंवा उपासनाभ्यासादानन्दस्य नित्यसुखस्य मितिः साक्षात्कारो यस्मात् पौनःपुन्येन ब्रह्मविषयकश्रवणमननेभ्यः स्वगतनित्यसुखसाक्षात्काररूपनिःश्रेयसं जीवस्य जायते इति भाव इत्येवमुक्तिर्भट्टसम्मता। "आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठित"मिति वाक्यमपि सूत्रसमानार्थकम्। किञ्च आनन्दो दुःखाभाव आत्यन्तिकदुःखनिवृत्तिरिति यावत्, तत्प्रयोजिका पौनःपुन्येन मितिः श्रवणमननरूपा यस्य स आनन्दमयः अत्र षष्ठ्यर्थो विषयत्वम्, इति भगवद्वासुदेवमहर्षिगोतमकणादमतमवलम्ब्य गदाधरेण व्याख्यातम्। वस्तुतस्तु मयट्प्रत्ययान्तमानन्दपदं परमतेऽपि ब्रह्मस्वरूपं बोधयितुं न प्रभवति प्राचुर्य्यविकारान्यतररूपार्थ एव मयट्प्रत्ययस्य विधानात्। रत्नमयो हारः पुष्पमयं माल्यं शालवृक्षमयं वनमित्यादिवाक्यं रत्नपुष्पशालवृक्षादिप्राचुर्य्यं बोधयेत्। सुवर्णमयमाभरणं मृन्मयो घट इत्यादिकन्तु सुवर्णस्य मृदश्च विकारं न त्वभेदमपि। तथा सत्याभरणमयं सुवर्णं घटमयी मृत्तिकेत्यपि स्यात्, एवञ्च ब्रह्मणो बहुत्वरूपप्राचुर्य्याभावेनानन्दविकारत्वासम्भवेन च कथं मयट्प्रत्ययान्तमानन्दपदं ब्रह्म बोधयेत्। नित्यं विज्ञानमानन्दं ब्रह्मेति वाक्यस्थितमानन्दपदमपि गुणमात्रतात्पर्य्यकञ्चेत् क्लीबलिङ्गत्वमाश्रयितुं न प्रभवति परन्तु पुंलिङ्गत्वमेव, गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वतीत्यनुशासनात्। नित्यं विज्ञानमानन्दं ब्रह्मेति वाक्यस्य विज्ञानाश्रय आनन्दजनकं नित्यं ब्रह्मेत्येवार्थः। ब्रह्मविद्ब्रह्मैव भवतीति वाक्यं ब्रह्मज्ञाने प्रवृत्तिदार्ढ्यार्थं तज्ज्ञानप्रशंसाव्याजेन न किं भावनात्मक तदुपासनाविधिं कल्पयितुं प्रभवति दर्शितयुक्त्या ब्रह्मसादृश्यं प्रतिपादयितुं वा। न चैकेन मृत्पिण्डेन सर्व्वं मृन्मयं विज्ञातं स्यात्

वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्। एवंविध-बहुदृष्टान्तवाक्यानि छान्दोग्योपनिषत्सु दृश्यन्ते दृष्टान्तघटक-मृद्विकारसाम्यस्यापि जगति प्रतीयमानत्वेन नितरां ब्रह्मोपादा-नकब्रह्मविकार एव जगदित्यवधारयितुं युक्तमिति वाच्यं, यतो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं भवतीत्युप-क्रान्तस्यासम्भवदुक्तिकत्वरूपदोषपरिहारेच्छोर्मुनेर्यथैकेन मृत्पिण्डेन सर्व्वं मृन्मयं विज्ञातं भवतीत्यंशमात्रदृष्टान्तेनैव कृतकृत्यता, दृष्टान्तवाक्यस्यापरभागस्तु मृत्पिण्डस्यैवावस्थाविवरणं तद्भागार्थस्तु दृष्टत्वान्ततया नाभिहितोऽनावश्यकत्वात् जगति ब्रह्मविकारत्वस्य बाधाच्च।

दृश्यत्वादृश्यत्वरूपविरुद्धद्वयसमावेशस्यैकस्मिन्नसम्भवेन त्र्यादि-पर्व्वतपर्य्यन्तस्य मास्तु परमाणुपुञ्जात्मकता। परन्तु निखिलानां त्रुट्यपेक्षया जन्यमहद्भावापन्नानां धान्यादिराशिवत् त्रुटिपुञ्जा-त्मकत्वमेव स्वीक्रियते न तु ततोऽन्यत् महत्त्वाश्रयः किमपि जन्या-न्तरमिति निपुणतरनैयायिकमतम्। एतदेव छान्दोग्योपनिषत्-स्थितेन वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यंशेन सुव्यक्तमेव प्रतिपादितम्। भावार्थस्तु वाचारम्भणमर्थात् उपा-देयतया व्यवहारमात्रविषयो न तु कीटादिपर्व्वतपर्य्यन्तेषु पार-मार्थिकं पृथिव्यादिरूपोपादानजन्यत्वम्। विकारः अर्थात् परस्परमसंयुक्तैकैकधान्यपरिमाणतस्तेषां परस्परसंयोगप्रसूतपरि-माणवैषम्यप्रत्ययवत् कथितभूतानां परिमाणवैषम्यमात्रं प्रत्यय-विषयः नामधेयमर्थात् घटपटपर्व्वतादिरूपैः पृथक् पृथक् नाम-भिस्त्रुटीनां विलक्षणसंयोगापन्नराशिविशेषस्य परिचयमात्रम्। मृत्तिकेत्येव सत्यमर्थात् तत्सर्व्वं पुञ्जभावापन्नपारमार्थिकत्रुटिरेव

न तु कार्य्यान्तरमिति। एतेन घटपटादीनां ब्रह्मस्वरूपत्वमित्यद्वैतवादिमतं निराकृतम्। तेषां ब्रह्मस्वरूपत्वे "मृत्तिकेत्येव" इत्येवकारस्यासङ्गतत्वापत्तेः।

दृष्टान्तवाक्यघटकसकलपदार्थसाम्यं दार्ष्टान्ते सिध्येदिति न नियमः, पटोऽयमेकव्यक्तिमात्रकर्त्तृक इति कस्यचिदुक्तिं श्रुतवतामेकमात्रकर्त्तृकत्वस्य कुत्राप्यदृष्टचरत्वेन एकमात्रकर्त्तृकत्वं सम्भवति न वेति संशयश्चेत् तन्निवृत्त्यर्थं श्रोतृनिश्चितपदार्थस्मारकशाब्दस्य जननार्थञ्च दृष्टान्तवाक्यं वक्ता प्रयुज्यते। तच्च यथैककुम्भकारमात्रकर्त्तृकोऽयं घट इति वाक्यम् इत्यनेनैव संशयनिवृत्तेः शिष्यव्युत्पत्त्यर्थं दृष्टान्तगतधर्म्मान्तरं प्रतिपादयितुं घटोऽयं चक्रनिर्म्मितो मृन्मयो निश्छिद्र इत्युक्तिसम्भवेऽपि तद्वाक्यं दार्ष्टान्ते चक्रादिनिर्म्मितत्वं न व्यवस्थापयति तत्र चक्रादिनिर्म्मितशङ्काविरहात् एवं रीतिर्दृष्टान्तदार्ष्टान्तस्थले सर्व्वत्रैव वेदितव्येति। अतएव—

पाण्डुपुत्रो यथा भीमो भीमः कर्णस्तथाहवे।
द्वयोः सम्मुखयुद्धेषु न जाने किं भविष्यति॥
यथा भीमस्थूलगदा संघातयति वैरिणम्।
दुर्य्योधनसहायस्य कर्णस्य सायकस्तथा॥
हरिणेव क्षुधार्त्तेन लक्ष्यं भीमेन लक्ष्यते।
कर्णो विराजते युद्धे मदस्वरकरीन्द्रवत्॥

इत्यादि वाक्यस्थदृष्टान्तार्थीभूतानां पाण्डुपुत्रत्वस्थूलत्वक्षुधार्त्तत्वादिरूपधर्म्माणां दार्ष्टान्तार्थकर्णसायकभीमेषु न सिद्धिः।

यथा नद्यः स्यन्दमानाः समुद्रे-
ऽस्तं गच्छन्ति नामरूपे विहाय।

तथा विद्वान् नामरूपाद्विमुक्तः
परात्परं पुरुषमुपैति दिव्यम् ॥

इति वाक्यस्थितयो विहायेति भागविमुक्तइति भागयोरसमापिका-क्रियाबोधकयोरर्थद्वय एव दृष्टान्तदार्ष्टान्तयोस्तात्पर्य्यं न तूक्तो-पनिषदर्थसमुदायांशे दृष्टान्तदार्ष्टान्तत्वम् अन्यथा नद्यादि-समुद्रांशत्वरूपावयवत्वादिकमपि दार्ष्टान्ते जीवात्मनि सिध्येत् अत-एव "यथा हसन् खं लभते दरिद्रो ददाति कर्णो द्रविणं तथा हसन्" इत्यादि वाक्यस्थितहसन्रूपपदद्वयार्थयोर्हास्यरूपा-समापिकाक्रिययोरेवानन्दसूचकत्वधर्म्मेणैव दृष्टान्तदार्ष्टान्तत्वं नत्व-परसर्व्वांशेऽपि, तथा बाधितार्थकत्वादित्यपि सुष्ठूपपद्यते। दृष्टा-न्तदार्ष्टान्तस्थले सर्व्वत्रैवेयं रीतिरवलम्बनीया। अथ परात्परं पुरुषमुपैति दिव्यमित्यनेन जीवस्य ब्रह्मण्यभेदपर्य्यवसानं स्पष्टमेव प्रतीयते तच्च कथं सङ्गच्छते यदि जीवपरमात्मनोः परस्परं पार्थक्यं स्यात् इति चेत् स्वर्गं प्राप्नोति नरकमुपैति मानव इत्यादि-वाक्यानि किं मानवादीनां स्वर्गाभेदं बोधयन्ति। अतः पुरुष-पदन्तु तत्र लाक्षणिकमेव लक्षणा च न विशुद्धब्रह्मस्वरूपत्वे तत्रे-दानीमप्रसिद्धं जीवान्तरव्यवहारोपयोग्यविद्यान्तरसत्त्वात्। तस्मा-द्ब्रह्मविन्नताविद्यानिवृत्त्यवच्छिन्नब्रह्मस्वरूपत्व एव इत्यद्वैतवादिसमा-धानं, नैयायिकानान्तु ब्रह्मसादृश्ये "मम साधर्म्यमागता" इति सुस्पष्टश्रवणात् यत्र यत्र प्राप्त्यादिक्रियासाकाङ्क्ष कर्म्मद्वितीयान्तं ब्रह्मबोधकपदं दृश्यते तत्र तत्रैवं रीतिरेवादरणीया।

उपनिषन्मीमांसा।

परमेश्वरः स्वयं शरीरं परिगृह्य सृष्टिप्रथमे सर्गान्तरसञ्चित-जीवादृष्टानि सहकृत्य प्रजाः समसृजत्, सर्व्वभूतहिततया च तासा-मैहिकपारलौकिकेष्टसाधनकर्म्मसु प्रवृत्तये निवृत्तये च बलवद्-द्विष्टानुबन्धि क्रियातस्तत्तत्कर्म्मप्रतिपादकवेदादिकमपि। विधि-निषेधार्थवादभेदेन वाक्यानां त्रैविध्यमिति महाजनपरम्पराव्यव-स्थापितम्। निषेधवाक्यानामपि विधित्वं केचन स्वीकृतवन्तः तन्मते वाक्यानां द्वैविध्यं विधित्वं, अर्थवादत्वञ्च। तत्रेष्टसाधन-कर्म्मप्रतिपादकं विधिवाक्यं, द्विष्टसाधनकर्म्मबोधकं निषेधवाक्यं, नामधेयमन्त्रभिन्नत्वे तदुभयभिन्नयावद्वाक्यमेवार्थवादः। अर्थ-वादास्तु बहुविधाः विध्युत्थापक-निषेधोत्थापक-स्तुतिनिन्दाद्यर्थवाद-भेदात्। प्रायशः सर्व्वएवार्थवादा विधिनिषेधान्यतरोत्थापकविधया प्रवृत्तिनिवृत्त्योः परम्परया प्रयोजकाः, तेषु केचन बाधितार्थका अपि विधिकल्पकाः। यथा "तुष्टायां नृप दुर्गायां निमेषार्द्धेन यत्फलम्। न तद्वक्तुं महेशोऽपि शक्तः कल्पशतैरपि॥" "तत्त्वमसी"त्यादि, "ब्रह्मविद्ब्रह्मैव भवति," "सर्व्वं खल्विदं ब्रह्मे"-त्यादयः। ते च कर्म्मप्रशंसाव्याजेन दशभुजापूजन-ब्रह्मज्ञानविध्यु-त्थापकजीवब्रह्माभेदभूतब्रह्माभेदभावनाविध्युत्थापकाः। जीवेषु भूतेषु च ब्रह्मभेदस्यैव दर्शितप्रमाणचयतर्काभ्यां व्यवस्थापिततया तुष्टायामित्याद्यर्थवादाः सर्व्वानुभूतबाधितार्थकतया चाहार्य्य-बोधजनका अपि न पुरुषदोषनिबन्धनभ्रमस्य जनका येन तत्प्रणेतॄणां भ्रमरूपदोषः प्रसज्येत। नन्वर्थवादानां प्रमाजन-कत्वाहार्य्य-भ्रमजनकत्व-निबन्धन-सबलत्व-दुर्ब्बलत्वे विधिनिषेधो-

व्यापकत्वेनैव तेषां बलवत्त्वात्। ननु कृत्स्नप्रसक्तिरित्यादि-सूत्रप्रदर्शितौ तर्कौ सर्व्वं खल्विदं ब्रह्मेत्यादिमहावाक्यप्रति-पादितस्य ब्रह्मणि भूताभेदस्य विपरीतसाधकतया तर्काभासा-वेव वेदार्थविरोधितर्काश्रयणे "अहमासं पण्डितको हैतिको वेद-निन्दक" इति वाक्येन दुरदृष्टजननस्य प्रतिपादितत्वात् इत्याशङ्का-निवृत्तये व्यासेन सूत्रान्तरं प्रणीतं, तत्सूत्रं यथा "श्रुतेः शब्दमूल-त्वात्"। परस्परभूतब्रह्मणोः पारमार्थिकभेदबोधको यः शब्दः अर्थात् महाजनपरम्पराव्यवहारः श्रुतेरर्थात् वेदस्य तन्मूलत्वात् तद्व्यवहारमूलीभूतवेदसत्त्वादिति भावः। यथा कठोपनिषद्-वाक्यं, "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसश्च परा बुद्धिर्बुद्धेरात्मा महान् परः॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः॥" "अशब्द-मस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्। अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते॥" बुद्धिपदप्रति-पाद्योऽनुभवः स्मृतिश्च, तादृशबुद्ध्यपेक्षया महान् अर्थात् विश्व-व्यापको जीवात्मा श्रेष्ठः। जीवात्मापेक्षया अव्यक्तमतीन्द्रिय-मर्थादृष्टं श्रेष्ठम्, अदृष्टापेक्षया पापपुण्याधिष्ठाता परमात्मा श्रेष्ठः। सा काष्ठा, अयं भाव उत्तरोत्तरोत्कर्षवतां चरमसीमा। अन्यत्सुस्पष्टार्थकमेव। अत्रोत्तरोत्तरोत्कर्षश्रवणेन ब्रह्मणि तत्-सकलपार्थक्यमवधार्य्यताम्। तत्र च पुरुषत्वनिर्द्देशेन गुण-विशेषपर्य्यवसन्नज्ञानानन्दस्वरूपता ब्रह्मणि निराकृता। गुणे पुरुषत्वव्यवहारस्यालीकत्वात्। अशब्दमस्पर्शमित्यादिवाक्येन भूतवर्गपार्थक्यस्य ब्रह्मणि सुस्पष्टं प्रतिपादितं तद्वाक्यस्थितमव्यय-मित्यनेन ब्रह्मणि ध्वंसाप्रतियोगित्वलाभेऽपि ब्रह्म साद्यनादि वेति

शङ्कानिवृत्त्यर्थं नित्यमित्युक्तम्। नित्यपदस्य कतिपयकालवृत्तिता-तात्पर्य्येणापि प्रयोगो दृश्यते यथा, "यथाऽहनि तथा प्रातर्नित्यं स्नायादनातुरः।" एवञ्चात्र नित्यपदं कतिपयकालवृत्तितातात्पर्य्यकं वा ध्वंसप्रागभावाप्रतियोगिरूपार्थतात्पर्य्यकमित्याशङ्का-निवृत्त्यर्थमनाद्यनन्तमिति नित्यविवरणोक्तम् अतोऽव्ययनित्याना-द्यन्तरूपपदत्रयोक्तिः समीचीनैव। एवञ्च वेदमूलकव्यवहारा-विरुद्धतया दर्शिततर्कयोर्नाभासत्वमिति। अथैतावता कथं परमात्मैव प्राप्तः दिक्कालयोरपि तत्तद्धर्मवत्त्वात् इति चेन्न दिक्का-लयोरीश्वरानतिरिक्तत्वेन सर्व्वज्ञप्रायदीधितिकृता व्यवस्थापिततया तदापत्तेरिष्टत्वात्। दिक्कालयोरिवाकाशस्यापीश्वरस्वरूपत्वं स्वी-कृत्य गगनमपि तथेति जगदीशेन स्वहस्तितं तच्च भ्रान्तिमूलक-मशब्दमस्पर्शमित्युपनिषद्विरोधात्। वस्तुतस्तु उपनिषद्वाक्ये पुरुषपदसत्त्वेन दिक्कालयोः पुरुषव्यवहाराविषयत्वेन च निरुक्तोप-निषद्वाक्येन दिक्कालबोधासम्भवात्। न च पुरुषत्वस्य जीवात्म-परमात्मनोर्धर्म्मतया तत एव भूतादिपार्थक्यलाभसम्भवे अशब्द-मस्पर्शमित्यादिकं पुनः कथमुक्तमिति वाच्यं नित्यस्यापि परमा-त्मनो गगनपरमाणुवत् शब्दस्पर्शरूपादिमत्त्वशङ्कानिवृत्तये रूप-स्पर्शाद्याश्रयीभूतशरीरादिरूपभूतवर्गाभेदशङ्कानिवृत्तये च तत्त-त्पदप्रयोगसार्थक्यात्। परमपुरुष इव स्पर्शादिमज्जन्यभूतेष्वपि पुरुषत्वसत्त्वस्य शास्त्रसिद्धत्वात्। यथा भगवद्वाक्यं "द्वाविमौ पुरुषौ लोके क्षरश्चाक्षरएव च। क्षरः सर्व्वाणि भूतानि कूटस्थो-ऽक्षर उच्यते॥" इति मार्कण्डेयवाक्यमपि "यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः। तावन्तः पुरुषा जातास्तद्वीर्य्यबलविक्रमा" इत्यादि। यत्तु दर्शितोपनिषद्वाक्ये यो यः परशब्दः प्रयुक्तः स

सूक्ष्मतात्पर्य्यको न तूत्कर्षबोधक इति तत्तुच्छं, तावतापि ब्रह्मणि तत्तत्पदार्थानां भेदो न किं सिध्यति। वस्तुतस्तु परशब्दस्य सूक्ष्मार्थकत्वं परैः स्वप्नलब्धमेवेति मन्यामहे, सूक्ष्मबोधे परशब्दस्य कोषासत्त्वात्। न च निरुक्तोपनिषद्वाक्येन यदि ब्रह्मणि भूतभेदः सुस्पष्टं प्रतिपादितस्तदा कथं पुनर्भगवता व्यासेन तर्कसूत्रं प्रणीतम् असत्यां शङ्कायां तर्कवैफल्यादिति वाच्यं भूतब्रह्मणोः परस्परपार्थक्यबोधकवाक्यानामिव तयोरभेदबोधकवाक्यानामपि सत्त्वेन तन्मूलकसंशयनिवृत्तये तर्कसाफल्यात् इति सूक्ष्मदर्शिनां सुष्ठुतरो विचारः। निषेधोत्थापकबाधितार्थकार्थवादस्तु "कुसुम्भं नालिकाशाकं वृन्ताकं पौतिकं तथा। भक्षयन् पतितस्तु स्यादपि वेदान्तगो द्विजः" "दीपनिर्व्वापनात्पुंसां कुष्माण्डच्छेदनात् स्त्रियः। अचिरेणैव कालेन वंशनाशो भवेद्ध्रुवम्" इत्यादि। केचिच्च स्तुतिवादात्मका बाधितार्थका एव परन्तु स्तुत्यसन्तोषजनकाः स्तुतिकर्त्तुर्शुभादृष्टहेतवो वा,यथा "कच्चित्त्वं स्थावरस्यासि सदा सिद्धिप्रदायिनी"इति, "कामो देवता कामः प्रतिष्ठहोते"त्यादयश्च। केचिच्च प्रमाणान्तरपरिशोधितार्थप्रतिपादकाः, यथा ब्रह्मप्रतिपादका "यः सर्व्वज्ञः सर्व्ववि"दित्यादयः, तर्कानुमानतो ब्रह्मणः सर्व्वज्ञस्य सिद्धेः। केचन प्रमाणान्तरावधारितार्थाविरुद्धार्थप्रतिपादकाः,यथा "सूर्य्याचन्द्रमसौ धाता यथापूर्व्वमकल्पयद्दिवञ्च पृथिवी"मिति"अप एव ससर्जादा"वित्यादयश्च, अतएवार्थवादानां प्रायशः परमुखापेक्षित्वेन सकलप्रमाणापेक्षया दुर्व्वलत्वं, विशेषतः स्तुतिवादानाम्। स्कन्दपुराणमप्येवमेवाह "नार्थवादोऽयमुदितः स्तुतिवादो न वै मुने। सत्यं यथार्थवादोऽयं श्रद्धेयः सद्भिरादरात्" इति। एवञ्चार्थवादमात्रं पर्य्यालोचितवन्तो मुनयोऽपि किमपि वस्त्ववधारयितुं न

प्रभवन्ति तेभ्यः, इति तदर्थनिश्चयार्थं तर्कोऽपेक्षणीयः। व्यासवचनमप्येवमेवाह यथा, "तत्रोपनिषदश्चैव परिशिषन्तु पार्थिव। मथ्नासि मनसा तात दृष्ट्वा चान्वीक्षिकीं पराम्" इत्यादि। एतद्वचनस्य"आन्वीक्षिकीं परा"मित्यनेन आन्वीक्षिक्या एव परत्वरूपविशेषणप्रतिपादनात् तस्या एव सर्व्वशास्त्रप्राधान्यं सूचितम्।

केचन वेदांशा अप्यर्थवादा न विधिनिषेधकल्पका न वा स्तुत्यात्मका विधिस्तावकाश्च नापि पदार्थतत्त्वप्रतिपादकाः, परन्तु किंवदन्तीरूपा एव। ते यथा अद्भ्रः सूर्य्य उदेति अप्स्वस्तमेति, राहुर्वै हस्ती भूत्वा चन्द्रमसं ग्रसतीत्यादयः। इत्यञ्चार्थवादनामधारिणां मध्ये कोऽयं वादः किंतात्पर्य्येण प्रयुक्त इत्यवधारणं कर्त्तुमनुमानरूपमुपायमनवलम्ब्य कः प्रभवेत्। समानाकारबहुकृत्रिमसुवर्णमुद्रामध्ये एका प्रकृतसुवर्णमुद्रा मिश्रिता चेद्विविधानुसन्धानं विना तां ग्रहीतुं कः शक्नोति। अतएव स्वोद्भावितयुक्त्यविरुद्धार्थकं यत्किञ्चिन्मात्रपरमवाक्यमुपलक्षीकृत्यैवाप्रतारकैरविजिगीषुभिरपि महर्षिभिर्विभिन्नार्थकदर्शनशास्त्राणि प्रणीतानि। तानि च सत्यत्रेताद्वापरेष्वपि प्रचलितानि, ते तु महर्षयो वेदान्तादिशास्त्रदृष्टिवर्ज्जिता वेदविश्वासरहिता वेत्युक्तावास्तिकानां कस्य हृदयं न कम्पेत। अद्वैतवादग्रन्थस्तु न कथितप्राक्कालेष्वजनिष्ट; परन्त्वनुमीयते पञ्चदशशतवर्षमध्य एव केनचिन्निपुणतरेण स प्रणीतः अतएव स्तुतिवाक्याद्यनात्मके कस्मिन्नपि महर्षिवाक्येऽद्वैतवादनामोल्लेखोऽपि नास्तीति चिरप्रचलितसिद्धान्तानुगमनमस्माकं न खलु दोषलेशायापीति। गोतमदर्शनन्तु बहुप्राचीनमित्यनुमीयते बहुऋषिवाक्येषु आन्वीक्षिकीतर्कशब्दप्रयोगदर्शनात् दर्शनाच्च विद्यारण्यमुनिप्रणीतलिख-

व्रह्म। तल्लिखनं यथा—मूलकारणात् परब्रह्मण उत्पन्ना आकाशकालदिशः परमाणवश्च यदा व्यवस्थिताः, तदा तत आरभ्य उत्तरकालीना सृष्टिर्गौतमाद्युक्तप्रकारेण व्यवतिष्ठताम्।

पूर्व्वप्रयुक्तविधिवाक्योत्थिताकाङ्क्षानिवृत्तिरूपप्रयोजनकतया यानि वाक्यानि प्रयुज्यन्ते ते चार्थवादा वाक्यशेषनाम्नाभिलप्यन्ते, ते तु पुनरबाधितार्थका एव अन्यथा प्रयोजनान्तरासत्त्वेन वाक्यशेषप्रयुक्तिर्वैफल्यमापद्येत, ते यथा "यवैर्यजेतेति" विध्युत्थाप्यायाः के यवपदतात्पर्य्यविषया इत्याकाङ्क्षाया निवृत्तये "वसन्ते सर्व्वशस्यानां जायते पत्रशातनम्। मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिन इति॥" "स्वर्गकामोऽश्वमेधेन यजेतेति" वाक्योत्थाप्यायाः कः स्वर्गपदार्थ इत्याकाङ्क्षाया निवृत्त्यर्थं "यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदमिति॥" "नीलं वा वृषमुत्सृजेत्" इति विध्युत्थाप्यायाः को नीलवृष इत्याकाङ्क्षायाः पूरणार्थं "लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डरः। पीतः खुरविषाणाभ्यां स नीलवृष उच्यते॥" इति च एवं "द्वे विद्ये वेदितव्ये" इति मुण्डकोपनिषद्विधिवाक्यस्थविद्यापदार्थोत्थाप्याया आकाङ्क्षाया निवृत्त्यर्थं "परा चापरा" चेति विवरणवाक्यम्। तद्विवरणवाक्यस्थापरापदार्थः क इत्याकाङ्क्षानिवृत्त्यर्थम् "ऋग्वेद" इत्यादि विवरणम्। तत्र परापदार्थः क इत्याकाङ्क्षानिवृत्त्यर्थं "यया तदक्षरं विद्यत" इत्यादि "यः सर्व्वज्ञः सर्व्ववि"दित्यन्तरूपं विवरणवाक्यम्। विवरणवाक्यानि तु निखिलान्यबाधितार्थकान्येव, तत्तद्वाक्यानामाकाङ्क्षानिवृत्तिरूपप्रयोजनमन्तरेणापरस्य कस्यापि प्रयोजनस्यासत्त्वात्। न च सर्व्वं खल्विदं ब्रह्म, वासुदेवः सर्व्वमित्याद्यर्थवादानामपि ब्रह्मविवरणत्व-

मेवास्त्विति वाच्यं, ब्रह्म किमितिजिज्ञासानिवृत्त्यर्थं तद्वाक्य-प्रयोगे परेषामद्वैतसिद्धान्तभङ्गप्रसङ्गात् । न च सर्व्वं किमिति जिज्ञासयैव तद्वाक्यं प्रयुक्तमिति वाच्यं, ब्रह्मज्ञानोपदेशात्मकं सर्व्वं वेदितव्यमिति विधिवाक्यासत्त्वेन तदुत्थाप्याशङ्कायाः प्रागसत्त्वात् । एतेन तत्त्वमसि श्वेतकेतवित्यर्थवादोऽपि व्याख्यातः । अपि च यद्यद्वाक्यं सर्व्वनामयत्पदघटितं भवेत् तत् सर्व्वमेवाबाधितार्थकम् इति सर्व्वेषामेव व्युत्पन्नानां सम्मतम् अतो यः सर्व्वज्ञ इत्यादि वाक्यस्य ब्रह्मस्वरूपपरतायां न कस्यापि विवादः ।

अथाद्वैतवादिनां "यः सर्व्वज्ञः सर्व्ववित्," "यतो वा इमानि भूतानि जायन्ते," "जन्माद्यस्य यत" इत्यादि वाक्यानामबाधितार्थकतायां को विवदते परन्तु तानि न ब्रह्मस्वरूपप्रतिपादकानि किन्त्वीश्वरप्रतिपादकान्येव, ईश्वरत्वञ्च ब्रह्मत्वविलक्षणधर्म्मः स च विशुद्धमोहावच्छिन्नत्वरूपस्तद्धर्म्मावच्छेदेन च सर्व्वज्ञत्वं सर्व्वकर्त्तृत्वमिष्टमेव शरीरधारित्वमपि तदवच्छेदेनैवेत्युपकथा इतिहासप्रियाणां मनसि विचित्ररसं प्रसूताम् । वयन्तु जानीमहे परमब्रह्मत्वं परमेश्वरत्वं परमात्मत्वञ्चैकमेव न तु पृथक् तत्पार्थक्यबोधप्रमाणाभावात्, ऐक्यप्रतिपादकप्रमाणचयस्यैव दृष्टत्वाच्च । यथा "उपासकानां कार्य्यार्थं ब्रह्मणो रूपकल्पना" "यदा यदा हि धर्म्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्म्मस्य तदात्मानं सृजाम्यहम् ॥" "परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे" इत्यादि । तत्तद्वाक्यानां मध्ये केनचिद्वचनेन ब्रह्मणः शरीरधारित्वं सुस्पष्टं प्रत्याय्यते, केनचिच्च परमेश्वरश्रीकृष्णस्य, एतावतेश्वरत्वे ब्रह्मत्व-

पार्थक्यं किं निर्णीयते ? एतेन सकलमानवकीटपतङ्गादिशरीर-धारित्वं ब्रह्मणो नास्तीत्यपि सुस्पष्टं सूचितम् ।

अपि च अविद्याबाहुल्येन तदवच्छिन्नब्रह्मण एव बहुत्वव्यवहारो मानवपश्वादिनिखिलशरीरधारित्वञ्चेति न छान्दोग्योपनिषत्सम्मतम् । उपनिषद्वाक्यं यथा "अहं बहु स्यां प्रजायेय ।" अस्यार्थो बहु भविष्यामि । एतेन सृष्टिप्राक्कालेऽनादिबहुमोहनिबन्धनबहुत्वव्यवहारो मयि नास्तीत्येव किं नायातम् । अन्यथा भविष्यत्वप्रयोगो न स्यात् । प्रजायेय इत्यस्य व्याख्या—प्रकृष्टशरीरधारित्वमर्थात्प्राकृतब्रह्मादि-निखिलावतारान्त-शरीरधारित्वरूपं प्रकृष्टजननमाश्रयिष्यामि न तु पश्वादिशरीरधारित्वरूपाण्यपकृष्टजन्मानि प्रशब्दस्वरसात् । एतेन ब्रह्मण एव जीवत्वमिति शङ्का निरस्ता । एवं ब्रह्मण एव निखिलजीवशरीरधारित्वे बहु स्यामित्यंशेनैव सामञ्जस्यसम्भवेन प्रजायेय इत्यस्य पुनरुक्तत्वापत्तेः । अस्माकं मते सर्व्वशरीरधारित्वशङ्कानिरासार्थमेव प्रजायेय इत्युक्तः सार्थक्यात् । एवं ब्रह्मणो विट्कीटपर्य्यन्तसर्व्वशरीरधारितायाः शास्त्रीयत्वे अहं बहु स्यामिति स्वरूपबोधकवाक्येऽपि बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते । वासुदेवः सर्व्वमितीति भावनापरवाक्यस्थसर्व्वपदवत् बहुपदमप्रयुज्य सर्व्वमित्येव प्रयोगः स्यात्, कतिपयानेकबोधस्थल एव बहुपदस्य प्रयोगात् अशेषबोधस्थले तु सर्व्वयावदादिशब्दस्यैव, न तु बहुशब्दस्यापि । अतएव सर्व्वे पटास्तन्तुजन्या बहवः पटास्तु नीलतन्तुजन्या इत्येव प्रयोगो दृश्यते न दृश्यते च सर्व्वे पटा नीलतन्तुजन्या बहवः पटास्तन्तुजन्या इति प्रयोगः । इदमप्यवधेयं अनाद्यविद्या शास्त्रतोऽनुमानतश्च न प्राप्ता तत्र च पुनर्विभुत्वाविभुत्वविवेको व्योमकमलिनीनां

सुगन्धदुर्गन्धत्वविवेकवत् न किं प्रतिभाति ? एवम् अथातो ब्रह्मजिज्ञासा जन्माद्यस्य यत इति प्रश्नोत्तर-व्याससूत्राभ्यामपि जगत्कर्तृत्वमेव परमब्रह्मत्वमिति सुस्पष्टं प्रतिपादितम् ।

इदमपि बोध्यं मुण्डकोपनिषत्स्थितं "द्वे विद्ये वेदितव्ये" इति वाक्यं साक्षाद्विधिरेव, तदुत्तरप्रदर्शित"पराऽपरा च तत्रापरा ऋग्वेद इत्यादि यः सर्व्वज्ञः सर्व्ववि"दित्यन्तवाक्यानि तादृशविध्यर्थविवरण-पराणि, प्रयोजनान्तरादृष्टेः । एवञ्च सर्व्वज्ञत्वेन ब्रह्मपदशक्यत्वं सुव्यक्तं न किं प्रतीयते ? तादृशधर्म्मेण ब्रह्मज्ञाने कैवल्योपायत्वञ्च । परेषां मते सर्व्वज्ञत्वस्य ब्रह्मधर्म्मत्वे मायावच्छिन्नस्यैव धर्म्मत्वे च तादृप्येण ज्ञानस्य कैवल्यानुपयोगितया "द्वे विद्ये वेदितव्ये" इति विधिवैफल्यापत्तेः । "आत्मा वारे श्रोतव्यः" "द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव च" इत्यादिविधिवाक्यतो ब्रह्मतत्त्वज्ञान एव मोक्षोपायताप्रतिपादनात् । ब्रह्माभेदबोधकापरोपनिषत्स्थित-वाक्यानि च प्रायशोऽर्थवादा एव अतस्तदुपनिषत्स्थविधिवाक्या-पेक्षया तेषां सर्व्वेषामेव दुर्व्वलत्वम् ।

अथ द्वे विद्ये वेदितव्ये इति विधिवाक्यमीश्वरतत्त्वेन सर्व्वज्ञ-त्वादिधर्म्मेणातिपरम्परया कैवल्योपयोगिनीं भगवदुपासनां बोध-यति न त्वासन्नोपायं ब्रह्मतत्त्वज्ञानं, मुक्तिमिच्छेज्जनार्द्दनादिति प्रमाणेनेश्वरोपासनायामपि मोक्षप्रयोजकताप्रतिपादनात् ; इति चेन्न यतः शक्तिविरिञ्चिमहेश्वरसुरहरशरीरधारिणः सर्व्वज्ञत्वजगत्-कर्त्तृत्वादिशालिनो विशुद्धब्रह्मतः कियदपि वैलक्षण्यं नास्तीति ब्रह्मणोरूपकल्पनेत्यादिप्रमाणजातेन युक्त्या ब्रह्मसूत्रेण चाव-धारितत्वात् विशुद्धब्रह्मण एव जगत्सृष्टिपालनप्रलयकर्त्तृत्वमित्युप-निषदन्तरमपि प्रमापयति यथा सर्व्वं खल्विदं ब्रह्म तज्जलान्

शान्त उपासीत इति एतद्वाक्यस्थतज्जलानित्यंशस्यार्थः तत्पदं प्रक्रान्तसर्व्वपदार्थपरं "जो" जन्म, "लो" लयः अन् प्राणने इति धातुगणपठितान्धातुना कर्त्तृविहितक्विप्प्रत्ययान्तेन स्थायी प्राणवायुर्बोध्यते। तद्वाक्यविग्रहस्तु सर्व्वस्य जन्मलयः अन् यस्मादिति। एतावतोक्तोपनिषद्वाक्यमध्ये अव्यवहितपूर्व्वप्रयुक्त-ब्रह्मपदस्यैव विश्वसृष्ट्यादिकर्त्तृत्वं न किं सुव्यक्तमायातम्। एत-दुपनिषद्वाक्यं पर्य्यालोच्येत्यवधार्य्यं सर्व्वं खल्विदं ब्रह्म इत्यन्तमर्थ-वादएव विधिप्रत्ययशून्यत्वात् स च भावनाविध्युत्थापकः। तज्ज-लान् शान्त उपासीत इत्यंशस्तु साक्षाद्विधिरेव स च आहार्य्य-ब्रह्मभेदभावनोत्तरं तात्त्विकब्रह्मतत्त्वोपासनाप्रतिपादकः अध्य-क्रमस्य प्रतिपाद्यक्रमिकत्वव्यवस्थापकत्वात्। "भक्त्या मामभि-जानाति यावान् यश्चास्मि तत्त्वतः।" "ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्" इति भगवद्वाक्यसमानार्थपरत्वौचित्येन दर्शितोपनिषद्भ्यां ब्रह्मणएव सर्व्वज्ञत्वसृष्टिकर्त्तृत्वादिकं परमतत्त्व-मिति प्रतिपादनं युक्तं न तु सर्व्वात्मकत्वं कस्मिन्नपि तादृश-परमवाक्ये तत्त्वत इत्यश्रवणात्। तस्मात् वासुदेवः सर्व्वं ब्रह्मभूतः प्रसन्नात्मेत्यादिभगवद्वाक्यदर्शनेनेत्येवावधारितं जीवे जगत्सु च ब्रह्माभेदज्ञानमतात्त्विकमेव तज्ज्ञानोत्तरं परमा भक्तिर्जायते तादृशभक्तिबलेन च क्रमशस्तात्त्विकं परमेश्वरविषयकज्ञानद्वयं भगवदुक्तिमध्ये तदंशएव तत्त्वत इति श्रवणात्। एवञ्च उप-निषदन्तरस्थतज्जलानित्यंशोऽपि विशुद्धब्रह्मणएव परमतत्त्वं न किं प्रतिपादयति? ततश्च भगवद्गीतायां यः सर्व्वज्ञः सर्व्वविदित्यन्त-विवरणसहितं द्वे विद्ये वेदितव्ये इति विधिवाक्यं तज्जलान् शान्त उपासीतेति विधिवाक्यञ्च पर्य्यालोच्य सर्व्वज्ञत्व-सर्व्वकर्त्तृत्व सर्व्व-

पालयितृत्व-सर्व्वसंहर्त्तृत्वरूपसकलधर्म्मेण ब्रह्मपरमतत्त्वेन ज्ञानरूप-कैवल्योपयोगिब्रह्मचरमोपासनां निर्व्वर्त्त्य तदुत्तरं जीवतत्त्वं ज्ञातव्यमिति न्यायविदां सिद्धान्तः।

अपिच कर्णविवराद्युदयास्ताचलादिरूपोपाधीनां नानात्वेन गगनदिगादीनामस्तु नानात्वव्यवहारः, एकस्य ब्रह्मणस्त्वेवं को विशेषोऽस्ति यमादाय तस्य नानात्वव्यवहारो भवेत्? सुतरां जीवानां भूतादीनाञ्च परमेश्वरस्वरूपत्वं कथमपि न हि सम्भवति। अत्राद्वैतवादिनः। अविद्यामोहमायापदाभिहितब्रह्मगतानादि-बहुविधभावएवोपाधितया स्वीक्रियते, तादृशोपाधिमहिम्नैव जीवानां बहुत्वं भूतादीनां नानाविधबहुत्वञ्च निराबाधं, तादृश-मोहजन्यतया च भूतादिकं सर्व्वं मिथ्यात्वेन गीयते, अयञ्च विशेषो ब्रह्मविष्णुमहेश्वरत्वव्यवहारोपयोगी मोहो विशुद्धसत्त्वप्रधानकः, जीवानान्तु न तथेति। अतो भगवतो महेश्वरादेरविद्याप्रसूत-विषयाकारज्ञानाद्याश्रयत्वेऽपि न भ्रान्तत्वं, अविशुद्धमोहस्यैव भ्रान्तत्वमूढ़त्वव्यवहारप्रयोजकत्वात्। न च भूतादीनामविद्या-जन्यत्वे किं मानं, "मायिकं जगत्" इति वाक्यस्यैव मान-त्वात्। न च दर्शितवाक्यस्थमायापदं प्रागभावपरमेवास्तु याव-ज्जन्येषु तज्जन्यत्वं सर्व्वानुमतमेवेति मायायाः पदार्थान्तरत्वे माना-भावः जीवगणस्तु तत्त्वतो ब्रह्मणः पृथगेवास्ताम् इति वाच्यं, अविद्याया अतीन्द्रियत्वेऽप्यनुमानतएव तस्याः पदार्थान्तरता-सिद्धेः। अनुमानप्रकारस्तु "घटोऽयं एतद्घटप्रागभावातिरिक्त-विनाश्यनादिजन्यः, घटत्वात् जन्यत्वाद्वा तद्घटातिरिक्तयावज्जन्य-वत्" इत्यनुमानेन तद्घटे निरुक्तजन्यत्वे साधनीये यन्निरूपितजन्यत्वं सिद्ध्यति, तदेवाविद्यादिनाम्नाभिलप्यते, दृष्टान्तवाक्यार्थे तादृश-

साध्यसजातीयश्च तद्घटप्रागभावातिरिक्ता ये ये प्रागभावा-स्तज्जन्यत्वरूपं जन्यमात्र एव, यतः स्वस्वप्रागभावजन्यत्वमुभय-वादिसिद्धमिति सिद्धान्तयति। स च सिद्धान्तो नाभिन्नस्मृतः जन्यमात्रस्यैव प्रागभावजन्यत्वस्य क्लृप्तत्वेन प्रागभावभिन्नवस्तु-निरूपितानावश्यकजन्यत्वस्यालीकत्वात्। न च दर्शितप्रमाण-सिद्धं पदार्थमपलपितुं कः प्रभवतीति वाच्यं, तथा सति सर्व्वैवा-विद्यां साधयित्वा तद्घटतदविद्याजन्यत्वातिरिक्ताविद्याजन्यत्व-स्यापि साधयितुं शक्यत्वात्। एवं रीत्या सहस्राविद्याजन्यत्व-स्येकत्र्यत्रावेव सिद्धापत्तेर्व्वारणस्य गीर्व्वाणगुरूणामप्यशक्तेः। प्रागभावस्यानङ्गीकारे साध्याप्रसिद्धेश्च। अपिच "तद्घटो निरुक्त-जन्यत्वाभावातिरिक्ता ये ये पक्षवृत्तिधर्म्मास्तदतिरिक्तधर्म्मवान् प्रमेयत्वादित्याद्याकारानुमानेन दर्शितजन्यत्वाभावस्यापि प्रकृत-पक्षे साधयितुं शक्यत्वात्, निरुक्तपक्षधर्म्मातिरिक्तत्वस्य दर्शित-जन्यत्वाभाव इव पक्षभिन्नमात्रवृत्तियावद्धर्म्मेषु सत्त्वेऽपि पक्षे न तेषां सिद्धिसम्भवो बाधितत्वात्परिशेषेण जन्यताभावसिद्धावेव पर्य्यवसानात्।

तद्घटान्यजन्यभिन्नत्वरूपं प्रतिहेतुमादायापि सत्प्रतिपक्षसम्भ-वाच्च किमधिकं धूमादिरूपप्रसिद्धहेतुनापि पर्व्वते सन्दिग्धवह्नेः सिद्धिर्भवितुं नार्हति वह्न्यभावातिरिक्तपक्षवृत्तिधर्म्मातिरिक्तधर्म्म-वान् प्रमेयत्वादित्याद्यनुमानतो दर्शितरीत्या वह्न्यभावस्यापि साधयितुं शक्यत्वात् एवं पर्व्वतान्यो यो वह्निमान् तदन्यत्वरूप-प्रतिहेतुरपि सम्भवति। तस्मात् सहचारमात्रदर्शनजन्यानुमाना-द्विवादानास्पदपदार्थसिद्धावपि तर्कपरिशोधितानुमानं विना विवादास्पदीभूतस्य कस्यापि वस्तुनो नानुमानिकी सिद्धिर्भवेत्।

एवंरीत्या दुष्टमेवाद्वैतवादिनां यावदनुमानं वस्तुतस्तु मायायाः पदार्थान्तरताखण्डनार्थं यो विचारो दर्शितः स च परं परेषा-मौद्धत्यनिवारणार्थमेव। दूरदर्शिनान्त्वविद्यामायाप्रकृतिपदार्थे-ष्वणुरपि विवादो नास्ति। तथाहि—अविद्यापदमसुरपद-वद्विरोध्यर्थकनञ्तत्पुरुषसमासात्मकं तथाच विद्यायास्तत्त्वज्ञानस्य विरोधि यत् स्वात्मनि देहाभिन्नत्वज्ञानं स एवाविद्यापदार्थः, अत्र विरोध एककाले एकत्रानवस्थानरूपं स्वात्मनि देहभिन्नत्वरूप-स्वात्मतत्त्वज्ञाने जाते तदा तदुत्तरं वा तत्र तदभेदज्ञानं तज्ज्ञान-मूलकवासना वा न भवितुमर्हति, यद्दोषबलेन विहितनिषिद्ध-कर्म्माचरणजन्यादृष्टभाज स्तन्मूलकानि पुनः शरीराणि परि-गृह्णीयुः। अविद्यापदस्यैवमेवार्थ उदयनाचार्य्यस्यापि सम्मतः। क्लृप्तपदार्थेन योगलभ्यार्थेन चोपपत्तिसम्भवे स्वेच्छानुरूपपदार्था-न्तरकल्पनस्य सर्व्वजनाश्रद्धेयत्वात्। एवञ्चानादिविनाशिभाव-रूपपदार्थान्तरं कल्पयित्वा तत्रैव मायादिपदार्थत्वव्यवस्थापनं भित्तिशून्यत्वादतीव घृणास्पदमेव। मायापदन्तु लीलया स्वेच्छया च स्त्रीलिङ्गविग्रहधारिब्रह्मैव प्रतिपाद्यते तत्रैव जगत्-कर्त्तृत्वं नित्यत्वम् अप्राकृतशरीरधारित्वञ्च, न तु जीवभावापन्नं निखिलभूतशरीरधारि तत् तत्र प्रमाणानि मार्कण्डेयपुराण-वाक्यानि,यथा राजोवाच। "भगवन् का हि सा देवी महामायेति यां भवान्। ब्रवीति कथमुत्पन्ना सा कर्म्मास्याश्च किं द्विज॥" इति प्रश्नोत्तरे ऋषिरुवाच। "नित्यैव सा जगन्मूर्त्तिस्तया सर्व्वमिदं ततम्। तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम॥ देवानां कार्य्यसिद्ध्यर्थमाविर्भवति सा यदा। उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते॥ अपिच तया विसृज्यते विश्वं जगदेतच्चरा-

परम्। सैषा प्रसन्ना वरदा नृणां भवति मुक्तये॥ एवं-विधार्थकानि आगमवाक्यान्यपि बहूनि वर्त्तन्ते ग्रन्थगौरवभयेन तान्यत्र न प्रदर्शितानि। उक्तवचनस्थकियदंशेन मायापदार्थे नित्यत्वश्रवणात् तत्रैव जगत्कर्त्तृत्वश्रवणाच्च।

कथं मायाया विनाशित्वं सम्भवदुक्तिकं कथं वा मायिकं जगत् इत्यादिवाक्यस्याऽप्रामाण्यापत्तिभयेन मायाया विनाशित्वं प्रकल्प्य पदार्थान्तरत्वं व्यवस्थापितम्। देवानां कार्य्यसिद्ध्यर्थ-माविर्भवति सा यदा। उत्पन्नेति तदा लोके सा नित्याप्यभि-धीयते इति महावाक्येनाऽमरनिकरेष्टकार्य्यनिर्व्वाहार्थमेव तस्या विग्रहपरिग्रहप्रतिपत्तेर्ब्रह्मण एव निखिलजीवकलेवरधारित्वव्यव-स्थापनं शास्त्रादृष्टिमूलकं मुक्त्यपरिज्ञानमूलकञ्चावधारयामः। न च नित्यैव सा जगन्मूर्त्तिरित्यंशेन निखिलभूतमूर्त्तिकत्वस्यापि ब्रह्मणि प्रतिपाद्यते इति वाच्यं देवकार्य्यार्थं ब्रह्म यदा शरीराणि गृह्णीयात् तदैवोत्पन्नत्वेन तद्व्यवहृतं भवेत् इत्यर्थस्य स्वरसत-उपपत्तये जगन्मूर्त्तिरित्यंशस्य मध्यपदलोपिबहुव्रीहित्वावधारणौ-चित्यात्। समासविग्रहस्तु जगति सुप्रसिद्धा मूर्त्तिरथवा जगद्भिः सेव्या मूर्त्तिर्यस्या इति। अतएव अजामेकां लोहित-शुक्लकृष्णामिति महावाक्यस्य स्त्रीचिह्नधारिब्रह्मपरतया आगमि-कानां व्याख्यापि साधीयसी। न च ब्रह्मणि रूपाभावेन तन्मते लोहितशुक्लकृष्णामजामित्यस्य कथमुपपत्तिरिति वाच्यं शरीर-स्योत्पादमादाय तत्रोत्पन्नत्वव्यवहारवत् शरीरस्य रूपवत्त्वमादाय तस्यापि रूपवत्त्वव्यवहारसम्भवादतएव "नवीननीरदश्यामं राम"-मित्यादि "स्वलीलया जगत्त्रातुमाविर्भूतमजं विभु"मित्यन्तवाक्यं "वं वेदशास्त्रपरिनिष्ठितशुद्धबुद्धि"मित्यादि "कृष्णात्विष"मित्यन्त-

वाक्यमेवंविधबहुतरवाक्यञ्च सुष्ठूपपद्यते । नैयायिकमते अजां परमाणुसन्ततिम् अद्वैतवादिमते चाविद्यासंहतिमित्यर्थ उभयमत एव एकं वनमित्यादिवत् एकामित्युपपत्तिरत्रैवैकशब्दः प्रधान-वाची । परन्त्वद्वैतवादिव्याख्यानं न समीचीनम् । यत्र भावे जन्य-भावत्वं तत्रैव भावनाशप्रतियोगित्वं लाघवेन सामान्यतः प्रति-योगितासम्बन्धेन भावनाशत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन जन्यभावत्वेन हेतुत्वात्, एवञ्च अजापदार्थस्तु तन्मतेऽपि न प्रागभाव-वदभावान्तरं लोहितशुक्लकृष्णादिगुणानां भावमात्रवृत्तित्वात् । सुतरामजाया नाशासिद्धौ अजापदस्य तन्मते अविद्यापरतया व्याख्यानं कथमपि न हि सम्भवति तैरविद्यानाशस्य स्वीकृतत्वात् । न च तन्मते भावनाशं प्रति ब्रह्मभिन्नभावत्वेनैव कारणत्वम् ईदृश-कार्य्यकारणभावो नैयायिकमतापेक्षया न गुरुतर इति वाच्यं यतो ब्रह्मभिन्नत्वमित्यत्र भेदः पारमार्थिको व्यावहारिको वा नाद्यः घटादिषु ब्रह्मणः पारमार्थिकभेदासत्त्वेन तेषां नाशानुप-पत्तेः । न द्वितीयः जीवेषु ब्रह्मणो व्यावहारिकभेदसत्त्वेन तेषां विनाशव्यवहारापत्तेः, न चेष्टापत्तिः शरीराणां नाशित्वबोधि-काया जीवानां नित्यत्वबोधिकायाश्च भगवद्गीताया विरोधापत्तेः, गीता यथा "अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः । अ-नाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत" इति । "प्रकृतिस्त्वञ्च सर्व्वस्य गुणत्रयविभाविनी"ति वाक्यस्थप्रकृतिशब्दप्रतिपाद्यं ब्रह्मेति लभ्यते प्रकृष्टा अर्थान्नित्या कृतिर्यस्या यस्य वा इति बहुव्रीहि-निष्पादितत्वात् अतएव प्रकृतेः क्रियमाणानीतिवाक्यस्थितं प्रकृति-पदं तत्परमेव । गुणत्रयपदेन सत्त्वरजस्तमोनामकान्यदृष्टानि जीवगुणा लभ्यन्ते तान् भावयति जनयतीति यावत् "सत्त्वं रजस्तम-

इति गुणाः प्रकृतिसम्भवा" इति वचनात्। अयं भावः निराभिषोपचारध्यानादिभिस्तोषिता सती सत्त्वनामकं शुभादृष्टं जनयति, वैधबलिदानाद्युपचारैर्विहितमन्त्रस्तुतिप्रणतिभिश्च तोषिता रजोनामकं शुभादृष्टम्—एतद्द्वयभिन्नं यावददृष्टं तमोनाम्नाभिधीयते तानि सर्व्वाणि भावयति जनयतीति यावत्। अनादिकर्म्माचरणपरम्पराजनितदुरदृष्टशुभादृष्टप्रसूतप्रवृत्तिवैषम्येण जीवाचरितसदसत्कार्य्याणि सहकृत्य ब्रह्मण एव तत्कर्तृत्वात्। "भूमिरापोऽनल" इत्यादिकमपि प्रकृतिशब्देन प्रतिपाद्यते। नियतं प्रत्ययसाकाङ्क्षशब्दोऽपि प्रकृतिशब्देन लभ्यते। अतएव प्रकृतिशब्दो नानाविधार्थक एव योगलभ्यरूढ़िशक्तिलभ्यपरिभाषालभ्यार्थभेदात्। ब्रह्मन्शब्द आत्मन्शब्दश्चैकार्थ एव तत्पदद्वयस्य आत्मत्वरूपजात्यवच्छिन्ने शक्तत्वात्। तादृशजातिश्च अहं सुखीत्यादि मानससाक्षात्कारविषयतया सिद्धा साक्षात्कारसिद्धघटत्वादिवत्। न च ज्ञान एव तदवच्छेदकत्वस्वीकार उचितः क्लृप्तेनैवोपपत्तावक्लृप्तायास्तादृशजातिकल्पनाया अन्याय्यत्वात्, साक्षात्कारविषयत्वं तत्रैव स्वीक्रियते साक्षात्कारविषयतया कस्या अपि जातिसिद्धेरदृष्टचरत्वात् कार्य्यकारणभावलाघवेन व्यवहारस्यान्यथानुपपत्त्या वा तत्सिद्धेर्दूरदर्शिगणसम्मतत्वात् घटत्वादिकन्तु कम्बुग्रीवादिजन्यत्वावच्छेदकतया पृथिवीत्वद्रव्यत्वादिकञ्च गन्धसंयोगविभागादिजनकतावच्छेदकतयैव सिध्यति। वस्तुतोऽहं सुखीत्यादिप्रत्यक्षे सुखादिरूपात्मविशेषगुणांश एव साक्षात्कारित्वं न त्वात्मत्वरूपजात्यंशेऽपि यद्बलेन जातिः सिध्येत्। तथा सति जीवेषु शरीरादिभिन्नत्वे चार्व्वाकादीनां विवादो न स्यात्। न हि साक्षात्कारसिद्धे वस्तुनि कोऽपि विवदते अतएव भाषापरि-

च्छेदः मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः इति वाक्यम् आत्मादिपदस्य ज्ञान इव विनिगमनाविरहेणेच्छायां कृतौ च प्रवृत्तिनिमित्तत्वकल्पनप्रयुक्तगुरुशरीरशक्तित्रयापत्तिभयेन जात्यवच्छिन्नाया एकस्या एव शक्तेः स्वीकारौचित्यात्। एवं साक्षात् परम्परया स्वावच्छेदकतावदितरवृत्त्यवच्छेदकताकमेकार्थनिरूपितं समनियतनानाकारणत्वमिव तादृशी नानाशक्तिरपि न सिद्धान्तिसम्मता। अत्र वीजं घटो घटः पटः पट इत्यादिवाक्यवदात्मात्मेति वाक्यस्य लक्षणाज्ञानं शक्तिभ्रमादिकं वा विना शाब्दाजनकत्वमिति नियमः सर्व्वसम्मत एव। दर्शितसमनियतनानाशक्तिस्वीकारे तु शक्तिप्रमयाप्यात्मात्मेत्याकाङ्क्षायाः शाब्दोपयोगित्वस्य अनिवार्य्यतया दर्शितनियमो भज्येत। अतश्चिरप्रचलितव्यवहारबलेनैवात्मत्वजातिः सिध्यति दर्शितनियमभङ्गभयेन लघुशरीरतज्जात्यवच्छिन्नशक्तिश्च। अपिच ज्ञानाद्यवच्छिन्नशक्तिस्वीकारे सुषुप्तिदशायां कैवल्यदशायाञ्चायं नात्मास्मिन्नात्मत्वं नास्तीतिवाक्यस्य प्रामाण्यापत्तेः।

यत्तु शक्तिज्ञानतज्जन्यपदार्थोपस्थितिनिष्ठजनकतयोरवच्छेदकघटकतयात्मत्वजातिः साधयितुं शक्यते एवञ्चात्मपदस्य तादृशजात्यवच्छिन्ने शक्तिस्वीकारे विवादलेशोऽपि नास्ति, जन्यजनकतावच्छेदकघटकतया जातिसिद्धेः सर्व्वसम्मतत्वात् तत्तुच्छं ज्ञानाद्यवच्छिन्नशक्तिज्ञानतज्जन्योपस्थित्योः कारणतयोरुभयवादिसिद्धत्वेन जात्यवच्छिन्नशक्तिं कल्पयित्वा पुनस्तज्ज्ञानत्वाद्यवच्छिन्नकारणताद्वयकल्पने महागौरवापत्तेः, इत्येवास्तां बाहुल्येनालम्।

एवञ्च "ॐ नमः सर्व्वभूतानि विष्टभ्य परितिष्ठते। अखण्डानन्दबोधाय पूर्णाय परमात्मने" इति दीधितिकारमङ्गलाचरण-

वाक्यस्थितपरमात्मन इत्यंशघटकात्मपदस्य ज्ञानावच्छिन्ने शक्ति-ग्रहाधरेण व्यवस्थापिता तत्कृतव्यवस्थायाश्च भ्रान्तिमूलकत्वं वक्तुं कथं शक्यते इति सञ्चिन्त्य वयं चञ्चलचेतसो भवामः।

अथ तर्कोऽपि कथमनुमानशोधको भवेत् स एव यदनवस्था-दोषकवलितः। अतएव तर्काप्रतिष्ठानादिति व्याससूत्रव्याख्या-ग्रन्थे शङ्कराचार्य्यलिखनं "निरागमाः पुरुषोत्प्रेक्षामात्रनिबन्धना-स्तर्का अप्रतिष्ठिता भवन्ति ; उत्प्रेक्षाया निरङ्कुशत्वात्। तथाहि कैश्चिदभियुक्तैर्यत्नेनोत्प्रेक्षितास्तर्का अभियुक्ततरैरन्यैराभास्यमाना दृश्यन्ते। तैरप्युत्प्रेक्षिताः सन्तस्ततोऽन्यैराभास्यन्त इति न प्रति-ष्ठितत्वं तर्काणां शक्यमाश्रयितुं पुरुषमतिवैरूप्यात्"। इति चेन्न "यस्तर्केणाभिसन्धत्ते स धर्म्मं वेद नेतरः" "दुर्लभं परमं ज्ञानं तर्के-णानुव्यवस्यति" "तत्रोपनिषदञ्चैव परिशेषन्तु पार्थिव। मथ्नामि मनसा तात दृष्ट्वा चान्वीक्षिकीं पराम्॥" "विद्यामान्वीक्षिकीं हित्वा तितीर्षन्ति भवार्णवम्।" "आन्वीक्षिकीमलर्काय प्रह्ला-दादिभ्य ऊचिवान्।" इत्यादिमहर्षिवाक्येन तर्कस्य निर्दोष-तायाः सुस्पष्टप्रतिपादनात्, अन्यथा तत्तद्वाक्यानामुन्मत्तप्रलपितत्वं स्यात्। पूर्व्वोक्तवचनस्थान्वीक्षिकीपदार्थस्तर्कविद्या तत्र कोषः— "आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः।" तर्कस्तु व्याप्या-रोपेण व्यापकारोपः। एवंविधारोपो न तर्कः किन्तु प्रकारा-न्तरमेव तदिति केषाञ्चित् कथनमुपकथायामेव पर्य्यवस्यति। न पश्यामि किमपि प्रकारान्तरत्वं तर्कस्य, यद्बलेन पदार्थतत्त्व-निर्द्धारणं गुरुरपि कर्त्तुं शक्नोति। तर्कमूलकानुमानेन पदार्थ-सिद्धेः प्रसिद्धस्थलं जन्यलिङ्गकभ्रमवदनुमितिरिव। उदयनाचार्य्य-सम्मतमेतदेव, तदुक्तिर्यथा "कार्य्यायोजनधृत्यादेः पदात्प्रत्ययतः

श्रुतेः । वाक्यात्मक्याविशेषाच्च साध्यो विश्वविदव्यय" इति । दर्शितप्रसिद्धस्थले तर्कादिपारिपाट्यं यथा सामान्यतस्तादात्म्यसम्बन्धेन जन्यं प्रति स्वनिष्ठकृतिसाध्यतासम्बन्धेनात्मत्वेन कारणत्वं न तु पृथिवीपर्व्वतपयोधिप्रभृतिभेदकूटवज्जन्यसामान्यं प्रत्येव कार्य्यतावच्छेदकगौरवात् दर्शितकार्य्यकारणभावनिर्णायकतर्कस्तु आत्मजन्यत्वं यदि निरुक्तभेदकूटवज्जन्यत्वपर्य्याप्तावच्छेदकताकं स्यात् तदाशुद्धजन्यत्वपर्य्याप्तावच्छेदकतापेक्षया बह्ववच्छेदकताघटितावच्छेदकताकं स्यादतो जन्यत्वपर्य्याप्तावच्छेदकताकत्वे लाघवमित्याकारकः। अल्पपदार्थस्वीकारेणैवोपपत्तौ बहुपदार्थाः केनापि न स्वीक्रियन्ते, अन्यथा ब्रह्मणोऽपि नानात्वस्वीकारः कमपचयं विदध्यात्, कथं वा गौरवापत्तिरूपतर्कं विना तस्यैकत्वं सेत्स्यति। दर्शिततर्केणात्मजन्यतायां जन्यत्वावच्छिन्नत्वे निश्चिते तदुत्तरं जन्यो यद्यात्मजन्यव्यभिचारी स्यात् जन्यो न स्यात्, तज्जन्यत्वस्य तत्तन्निरूपितव्याप्यताघटितत्वनियमात्, अन्यथा सिद्धानिरूपकतत्तद्व्याप्यत्वहेतुना वा तत्तज्जन्यतासिद्धेश्च अनौपाधिकत्वहेतुना व्याप्यत्वसिद्धिवत् । ईदृशतर्कबलेन जन्यमात्र एवात्मव्याप्यत्वनिश्चयोत्तरं क्षित्यादावात्मव्याप्यजन्यरूपहेतुपरामर्शात् स्वनिष्ठकृतिसाध्यत्वसम्बन्धेनात्मानुमितिर्जायते ; पृथिवीपर्व्वतादिकं जीवाकर्त्तृकमितीतरबाधसहकारेण दर्शितहेतुपरामर्शजन्यानुमितिविधेयतापन्ननिष्ठभेदप्रतियोगितावच्छेदकैकत्ववत्त्वे गौरवं तादृशभेदप्रतियोगितानवच्छेदकैकत्ववत्त्वे लाघवमिति लाघवगौरवप्रतिसन्धानेन च साध्यविधया य एकः सिध्यति स एव सर्व्वकर्त्ता परमेश्वर इति । न चैकमेवाद्वितीयमिति महावाक्यबलेनैव ब्रह्म सिद्ध्यति तन्नैकत्वञ्च, अतः कथं दर्शितरीत्या लाघवज्ञानादिघटित-

तर्कमनुसन्धाय शिरोवेष्टननासिकास्पर्शन्यायेन ब्रह्मसिद्धिप्रयासः सुतरां तर्कोऽकिञ्चित्कर इति वाच्यं, यतो “ब्राह्मणार्थेव गायत्र कुलमेकं द्विधाकृतम् । एकत्र मन्त्रास्तिष्ठन्ति हविरन्यत्र तिष्ठति ॥ द्रव्यं गुणास्तथा कर्म्म सामान्यं सविशेषकम् । समवायस्तथा-भावः पदार्थाः सप्त कीर्त्तिताः ॥” इत्यादिभूरिप्रयोगदर्शनादार्ष-वाक्यस्थप्रथमैकपदार्थस्य कुलत्वरूपधर्म्मे तद्वचनस्थितद्वितीयैक-पदार्थस्यापि तत्रैव चान्वयो दृश्यते द्वितीयवाक्यस्थसप्तपदार्थस्य च तद्वाक्यस्थद्रव्यत्वादौ । तद्वदेकमेवाद्वितीयमिति वाक्यस्थैकपदा-द्वितीयपदार्थयोरपि ब्रह्मत्वरूपानुगतधर्म्मे उत्सर्गतोऽन्वयो भवितु-मर्हति एवञ्च तत्रान्वयं स्वीकृत्य वाक्यार्थपर्य्यवसानसम्भवेन तद्वाक्यं ब्रह्मणो नानात्वशङ्कां कथं निवर्त्तयिष्यति ।

एवमेकमात्रयागजन्यं तदनुष्ठातुरेकमेवादृष्टं जायते न तु तच्छक्तितो युगपदुत्पन्नविनष्टादृष्टकोटय इत्याद्युपपत्त्यर्थमपि दर्शितरीतिरवलम्बनीया । तर्काकारस्तु तद्यागजन्यत्वं यदि ध्वंस-प्रतियोगिमात्रवृत्तिबहुत्ववत् स्यात् तदा ध्वंसनिष्ठप्रतियोगिता-सम्बन्धावच्छिन्नजन्यतानिरूपितोभयावृत्तिधर्म्मावच्छिन्नजनकता-कूटवत् स्यात् । बहुत्ववत्त्वं व्यापकत्वसम्बन्धेन । कूटवत्त्वञ्च सामानाधिकरण्यसम्बन्धेन । एकेनैवोपपत्तावनावश्यकबहुजन्य-जनकभावकल्पनायाः सर्व्वेषामननुमतत्वेनेष्टापत्तिर्न हि सम्भवति, इत्थञ्च तर्कमात्रमेव लाघवगौरवाद्यनुसन्धानपर्य्यवसायीति वेदि-तव्यम् ।

एवं स्थिते दर्शितोद्भाविततर्कं विपरीततर्कमुद्भाव्याभियुक्ततरो-ऽभियुक्ततमो वा कोऽन्यथाकर्त्तुं शक्नोति । अतः “कैश्चिदभियुक्त-तरैरुत्प्रेक्षितास्तर्का अन्यैरभियुक्ततमैराभासमाना दृश्यन्ते, उक्ते-

श्राया निरङ्कुशत्वात्” इत्यादि लिखनं शङ्कराचार्य्यस्य स्वकीयच्छात्रसन्तोषार्थमेवेत्यवधारयामः। तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षदोषप्रसङ्ग इति व्याससूत्रन्तु जीवब्रह्मण ऐक्यनिरासकम्। सूत्रव्याख्या च—तर्काप्रतिष्ठानात् तर्कस्यास्थितेः, अन्यथा प्रकारान्तरेण सहचारदर्शनमवलम्ब्य इति यावत्। अनुमेयम् अर्थात् जीवेषु ब्रह्माभेदानुमितिः कार्य्या, इत्यद्वैतशङ्कानिरासायाह अविमोक्षदोषप्रसङ्ग इति। अविमोक्षदोषः अप्रामाण्यज्ञानास्कन्दितत्वरूपदोषः तस्य प्रसङ्गः आपत्तिः। भावार्थस्तु यत्र तर्को नोद्भाव्यते तत्राप्रामाण्यज्ञानानास्कन्दितानुमानं न सम्भवति अतएव जीवब्रह्मणोरभेदसिद्धौ तर्को नास्ति अतो न तयोरभेदसिद्धिः। न च सहचारमात्रज्ञानेनाभेदानुमानं भवेत् ब्रह्मविष्णुमहेश्वरादिप्रभृत्यवतारादान्तर्भावेण सहचारदृष्ट्या जीवेऽपि तदभेदानुमितिर्भवेत् इत्याशङ्कानिवृत्त्यर्थं समाधानसूत्रमविमोक्षदोषप्रसङ्ग इति। सहचारदर्शनेन भ्रमात्मकज्ञानास्कन्दितानुमितिजननात् भ्रमात्मकज्ञानानास्कन्दितानुमित्यादिनैव पदार्थसिद्धेः सर्व्वसम्मतत्वात्। ब्रह्मणोऽप्राकृततत्तत्शरीरपरिग्रहे तु बहुतरप्रमाणं दर्शितम्।

तर्कस्यैव निश्चायकत्वं सूत्रान्तरेणापि व्यासेन प्रतिपादितं,सूत्रं यथा—“कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा” इत्यस्य व्याख्या, कृत्स्नप्रसक्तिरर्थात् ब्रह्म यदि घटाद्यभिन्नं सत् तदुपादानं स्यात् तदा तद्गतरूपरसस्पर्शाद्यात्मकयावद्गुणवत् स्यात्। तर्कोपयोगिनो सामान्यतो व्याप्तिस्तु—यो यदभिन्नं सद्यदुपादानं भवेत् स त्ववश्यमेव तद्गतयावद्विशेषगुणवानित्याकारिका। तेजःपवनपयःप्रभृतिः सर्व्वजनव्यवहृतोपादानवत्। न चाद्वैतवादि-

भिस्तदापत्तिरिष्टैवेति वाच्यम् "अशब्दमस्पर्शमरूप"मित्यादिमहावाक्येन ब्रह्मणि रूपाद्यभावस्य सुस्पष्टं प्रतिपादितत्वेन इष्टापत्तेरयोगात्। अथ व्यावहारिकतेजःपवनपयस्त्वाद्यवच्छेदेन रूपादिमत्त्वं स्वीकार्य्यं ब्रह्मत्वावच्छेदेन च तदभाव उत्पन्नगुणानामव्याप्यवृत्तितायास्तार्किकैरपि स्वीकारात् अतउक्ततर्क इष्ट एवेति यदि ब्रूयात् तदाप्याह निरवयवत्वशब्दकोपो वेति। अस्यार्थः जन्यत्वेन व्यवक्रियमाणं वस्तु यद्यनुत्पन्नाभिन्नम् अथवा प्रलयावस्थिताभिन्नं स्यात् तदा निरवयवत्वबोधकशब्देन व्यवहर्त्तव्यं स्यात् शरीरघटपटादिकं निरवयवमिति व्यवहारस्याद्वैतवादिभिरप्यनङ्गीकारात्। दृष्टान्तो ध्वंसप्रागभावप्रभृतयोनिखिलनित्यपदार्थाश्च। अद्वैतवादिमते तु अनाद्यविद्यासहस्त्रं जीवाः परमाणवश्च। अव्यक्तादीनि भूतानीति भगवद्वाक्येन परमाणूनामपि प्रलयावस्थितेः प्रतिपादनात्। एतेन जन्यद्रव्याणां परमाणुपुञ्जात्मकतावादः प्रकृतिपरिणामवादश्च निरस्तः। एवञ्च "सर्व्वं खल्विदं ब्रह्मे"त्ति वाक्यसहस्रमपि भूतेषु ब्रह्माभेदं साधयितुं न प्रभवेत्। अतः परं कुकल्पनया काऽपि शङ्का जायते चेत् तन्निवृत्तये दर्शितसूत्रप्रणेतारं मुनिवरं वेदव्यासं परिपृच्छ। अत्र च सर्व्वं खल्विदं ब्रह्मेत्यादिवाक्यचयार्थनिश्चयार्थमत्र ग्रन्थे प्रदर्शितानि "घट त्वं धर्म्मरूपोऽसि," "शालग्रामः स्वयं हरि"रित्याद्यसंख्यवाक्यानि। उक्ततर्कयोराभासत्वशङ्कानिवर्त्तकं "श्रुतेस्तु शब्दमूलत्वा"दिति व्याससूत्रञ्च। अस्य व्याख्या तु प्राक् प्रदर्शिता।

संस्थान

परमाणुतत्त्वनिरूपणम्।

परमाणुपदार्थानां प्रामाणिकत्वे विवादलेशोऽपि नास्ति, "भूमिरापोऽनलोवायु"रिति, "एतद्‌योनीनि भूतानि" इति, "अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत। अव्यक्तनिधनान्येव"त्यादिरूपया भगवद्गीतया, "स य एषोऽणिमे"त्युपनिषद्वाक्येन, "अजामेकां लोहितशुक्लकृष्णा"मिति महावाक्येन, "असद्वेदमग्र आसीत् ततो वै सदजायते"त्युपनिषदा, विद्यारण्यमुनिप्रणीत-"परब्रह्मण उत्पन्ना आकाशकालदिशः परमाणवश्च यदा व्यवस्थितास्तदा तत आरभ्य उत्तरकालीना सृष्टिर्गौतमाद्युक्तप्रकारेण व्यवतिष्ठताम्" इति प्रतीकेन भगवत्कणादप्रणीतसूत्रेण च परमाणुसत्तायाः सुस्पष्टं प्रतिपादितत्वात्,भगवदक्षपादमहर्षिसम्मतत्वाच्च। भगवदक्षपादान्तेवासिना भगवन्महर्षिवेदव्यासेनाऽपि परमाणवस्तदुपादेयद्रव्याणि तेषां समवायश्च स्वीकृताः, उपादेयत्वञ्च समवायेन वृत्तिमत्त्वे सति जन्यत्वम् इति तत्कृतसूत्राणि दृष्ट्वावधारितं, तद्‌यथा "महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यां" "समवायाभ्युपगमाच्च साम्यादनवस्थिते"रिति, परिमण्डलत्वं नित्याणुत्वं, "पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृत"मिति प्राचीनकारिकया तथैव प्रतिपादनात्। तत्सूत्रस्थमहत्पदं दीर्घपदञ्च भावप्रधानपरम्, एवञ्च तत्पदद्वयार्थौ महत्त्वं दीर्घत्वञ्च महत्त्वबोधतात्पर्य्येण महत्पदप्रयोगस्य शिष्टपरम्पराप्रचलितत्वात्। यथा "कालखात्मदिशां सर्व्वगतत्वं परमं मह"दित्यादि। सूत्रस्थितधर्म्मिवाचकपदानां प्रायशो धर्म्मपरता इत्यपि दृश्यते,"कर्म्मणि द्वितीया,""कर्त्तृकरणयोस्तृतीया," "अधिकरणे सप्तमी,""हेतौ तृतीये"त्यादिसूत्रस्थितकर्म्मादिपदानां

कर्म्मत्वादिरूपधर्म्मपरतां विना गत्यन्तराभावात्। तत्तत्सूत्राणां कर्म्मत्वेनाभिमतपदोत्तरं द्वितीयादिविधानपरत्वं न हि सम्भवेत् तेषूत्तरत्वबोधिकायाः पञ्चमीविभक्तेरसत्त्वात्, अतएव "चिरप्रक्लृप्त्यादिभ्यश्च" इत्यादिसूत्रे पञ्चमी विभक्तिरेव प्रयुक्तेति नैयायिकानां सिद्धान्तः। एवं कणादविद्यारण्यमुनिगौतममहर्षिसम्मतस्य परमाणुजन्यत्वस्य व्याससम्मतत्वौचित्येन तत्पदद्वयस्य भावपरतायां एव युक्तत्वात्। न हि जिगीषाशून्यवेदव्यासेन बहुमहर्षिमतविरुद्धवादः सम्भवेत्, एवञ्च तत्पदोत्तरं मतुप्प्रत्यय एव न तु सदृशार्थको वत्प्रत्ययः। सूत्रस्थदीर्घपदं सर्व्वमत एव लाक्षणिकं, न्यायमते लक्ष्यार्थौ द्व्यणुकत्वमद्वैतवादिमते तु द्व्यणुका इति प्रभेदमात्रम्। परमाणुस्वरूपोपादानतो महत्त्वविशेषात्मकदीर्घत्वापन्नस्य कस्याप्यजननात् द्व्यणुकस्य च दीर्घत्वेन महत्त्वेन चाव्यवहारात्। अद्वैतवादिनस्तु जगतां ब्रह्मोपादेयत्वमेव न तु परमाणूपादेयत्वं ब्रह्मोपादेयत्वं वा अतस्तत्सूत्रेण तार्किकसम्मतपदार्थस्य दृष्टान्तविधया प्रदर्शनमिति निर्णयन्ति, एतदतीव हास्यास्पदं जगतां ब्रह्मोपादानकत्वं किं तैः स्वप्नलब्धं तत्कृतेकेनापि सूत्रेण तत्प्रतिपादनस्यादृष्टेः परन्तु ब्रह्मकर्त्तृकत्वप्रतिपादनस्यैव दृष्टेः। प्रत्युत कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वेति सूत्रेण जगति ब्रह्मोपादानकत्वनिषेधप्रतिपादनमेव दृश्यते।

इत्थञ्च परमाणुस्वीकारे प्रेक्षावतां विवादो नास्ति परन्तु विद्यारण्यमुनिप्रणीतवाक्यस्य प्रकृततात्पर्य्यावधारणाक्षमाणां तेषु प्रसिद्धेषु नित्यत्वे विवादः कथञ्चिद्भवितुमर्हति। विद्यारण्यमहर्षिवाक्यप्रकृततात्पर्य्यविषयार्थस्तु उत्पन्ना उत्पन्नधर्म्मवन्तः काले प्राकाशे च नित्यत्वबोधकप्रमाणसत्त्वेन तत्रोत्पादस्य बाधितत्वात्,

प्रमाणं यथा, अनादिनिधनः काल इति, स च कालः सनातन इति, आकाशवत् सर्व्वगतश्च नित्य इत्यादि च। एवञ्च कालादावन्वयानुरोधेन तत्रोत्पन्नपदस्य यद्युत्पन्नधर्मवदर्थकत्वस्वीकारावश्यकत्वं तदा "सकृदुच्चरितः शब्दः सकृदर्थं गमयति" इति नियमबलेन तत्त्वोत्पन्नपदमुत्पन्नधर्मवदर्थान्वयं परमाणुष्वपि बोधयितुमेव प्रभवेत्। दिगाकाशकालानामुपाधिभूतोदयाचलास्ताचलकर्णशष्कुलि-शब्दतपनक्रियाप्रभृतिधर्मस्योत्पादवत् द्व्यणुकारम्भकपरमाणुगतसंयोगरूपधर्मस्योत्पादो निराबाध एवेति। एवंरीत्या शरीराणां जन्यत्वमादायैव तदात्मानं सृजाम्यहमिति महावाक्यलब्धात्मनो नित्यत्वेऽपि सृष्टत्वमुपपादनीयम्। आत्मनो नित्यत्वे प्रमाणं यथा भगवद्वाक्यम् "अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः। अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारते"ति। तद्ध्वंसप्रागभावाद्यनवस्थिताभावरूपानन्तपदार्थकल्पनापत्तिरपि तेषां नित्यत्वं साधयति। किञ्च सकृदुच्चरितेति नियमानङ्गीकारेऽपि परमाणुषु उत्पन्नत्वस्य साक्षादन्वयस्वीकारेऽपि चाद्वैतवादिनां नेष्टसिद्धिर्भवेत्। विद्यारण्यमुनिवाक्यस्थपरमाणुपदस्य द्व्यणुकार्यबोधकत्वसम्भवात्, तथाहि यथा द्वावणू यत्रेत्याकारो द्व्यणुक इति बहुव्रीहेर्विग्रहस्तथा परमोऽणुर्यत्रेत्याकारविग्रहः परमाणुशब्दस्यापि सम्भवेत्, इदन्त्ववधातव्यं यत्र नित्यत्वविशेष्यतात्पर्य्येण परमाणुपदं प्रयुज्यते तत्र तत्पदं कर्म्मधारय एव यत्र तूत्पन्नत्वधर्म्मितयान्वयबोधार्थं तत्पदप्रयोगस्तत्रैव दर्शितबहुव्रीहिरिति परैरपरिशीलितः पन्थाः।

परे तु विद्यारण्यमुनिप्रयुक्तमुत्पन्नपदं न लाक्षणिकं योगलभ्यार्थकमेव, परन्तु आकाशपदं क्वचिदपवादविषयेऽप्युक्तगौऽभि-

निविशत इति शाब्दिकव्यवस्थया तस्येदमिति सूत्रेण तद्धितटण्-
प्रत्ययान्तमेव। परमाणुपदस्य दर्शितार्थकमतो न काप्यनुप-
पत्तिः। न च दिशः कथमुत्पन्नत्वं तस्याः सदातनत्वादिति वाच्यं
तस्याः सदातनत्वबोधकबलवत्प्रमाणादृष्टत्वेन पूर्व्वपश्चिमव्यवहारा-
नुरोधेन च जन्यद्रव्याणामेव दिक्त्वाङ्गीकारात्, अतएव "प्रलये
दिग्देशव्यवहारो नास्ती"ति प्रसिद्धनिबन्धकारजगदीशलिखनमपि
साधु सङ्गतम्। अथवा महादिशो नित्यताया महर्षिकणादसम्मत-
त्वेन तस्या नित्यत्वावश्यकत्वेऽपि द्रव्यं जन्यं नित्यञ्च, पर्व्वतो
वह्निमानित्यादिवत् दिक्सामानाधिकरण्येनैव विद्यारण्यमुनि-
प्रयुक्तोत्पन्नपदार्थस्यान्वयोपगमात् दिक्शब्दस्य तु महादिग्जन्य-
द्रव्यस्यैतदुभयबोधकताया निपुणतरदूरदर्शिसम्मतत्वात्। मुनि-
वाक्यस्थकालपदस्य तु दर्शितरीत्योत्पन्नपदार्थान्वयः सम्भवति तत्-
पदस्य महाकालस्येव क्रियाणां निखिलजन्यानां वा बोधकताया
आचार्य्यपरम्पराङ्गीकृतत्वात्, महाकालस्यैव निखिलजन्यानां
कालत्वमिति सर्व्वज्ञप्रायचिन्तामणिदीधितिकारेणापि स्वहस्तितं
तल्लिखनं यथा "अष्टद्रव्यातिरिक्तद्रव्यात्मककालमात्रवृत्तिधर्म्मस्य
किमपि व्यापकं न स्या"दिति केवलमहाकालस्यैव कालत्व महा-
कालवृत्तिधर्म्मस्य प्रत्यायनार्थमतिरिक्तान्तलिखनं व्यर्थं स्यात्
कालमात्रवृत्तीत्यंशेनैव सामञ्जस्यसम्भवात्,अतएव "अनादिनिधनः
काल" इत्यादिप्रमाणसत्त्वेऽपि ऋतञ्च सत्यञ्चेति मन्त्रस्थं रात्र्य-
जायत अहोरात्राणि विदधदित्यपि सुष्ठु सङ्गतम्। तत्र रात्र्यादि-
पदानां क्रियाकूटतात्पर्य्येण जन्यात्मककालतात्पर्य्येण वा प्रयुक्त-
त्वात्। तन्मन्त्रस्थितपृथिवीशब्दान्तरीक्षमिति चकारोत्तरं तद्वि-
तानात्मकमान्तरीक्षपदमेव न त्वन्तरीक्षपदम्, आकाशः सम्भूत इत्युप-

निषद्वाक्यस्थमाकाशपदमपि प्राग्दर्शिततद्धितान्तमिवच्च तत्तत्-पदार्थानां नित्यत्वेऽपि न किञ्चिदनुपपन्नम् । अपिच दिक्काल-पदवत् आकाशपर्य्यायपदान्यपि नित्यमिव जन्यविशेषं बोधयेत् तत्र पृथिव्युपरिस्थिततदसंयुक्तस्थिरवाय्वाद्यात्मकम् अन्यस्य दुर्व्वच-त्वात्, अतएव खेचरो भूमिचरः खगगणो गगणोपरि शोभते इत्यादिकप्रामाणिकप्रयोगोऽपि साधु सङ्गच्छते । अन्यथा विश्व-व्यापिन एव आकाशपदबोध्यत्वे दर्शितविभक्तरूपेण प्रयोगो न स्यात्, सर्व्वेषामेव खेचरत्वात्, विश्वव्यापिन ऊर्द्धत्वाद्यप्रसिद्धया "गगणोपरि" इत्यस्य बाधितार्थकतापत्तेः । अतएव गगणादि-पदेन शक्त्या निरूढ़लक्षणया वा वायुविशेषमयस्थानप्रतिपत्ति-श्रौव्ये नापत्त्यनुपपत्तिलेशोऽपि ।

एवञ्चार्थवादस्थितोत्पन्नादिपदं दर्शितस्थानविशेषेऽन्वयबोध-तात्पर्य्येणैव सुष्ठूपपद्यते । प्राग्दर्शित—"द्रव्यं जन्यं नित्यञ्च" "पर्व्वतो वह्निमान्" इत्यादिस्थल इव दिक्कालत्वाकाशत्व-सामानाधिकरण्येनोत्पन्नादेरन्वय उपगन्तव्यः, सुतरां दिगा-दीनामुत्पन्नत्वादिबोधकस्यापि महावाक्यस्य न हि बाधितार्थ-कत्वम् । अतएव "धार्ष्ट्यः कथङ्कारमहं भवत्या वियद्विहारी वसुधैक-गत्या । अहो शिशुत्वं तव खण्डितं न स्मरस्य सख्या वयसाप्य-नेन ॥" इति सर्व्वदर्शनखण्डनकारश्रीहर्षकृतश्लोकस्थवियद्विहारी-त्वांशेन हंसस्यैव वियद्विहारित्वं,न तु दमयन्त्या इति प्रतिपादितम्, एतदपि साधु सङ्गतं दर्शितबहुविधप्रयोगस्य स्वारसिकत्वदर्शनेन ताद्दशवायुविशेष एव शब्दगुणा जायन्ते, तावतैव "शब्द-गुणमाकाश"मिति चिरप्रवादस्यापि सुष्ठूपपत्तिसम्भवात्, एवञ्च शब्दसमवायिकारणतया विश्वव्यापिपदार्थान्तरं कल्पं सेतुमर्हतो-

त्वधुनातनकेषाञ्चिन्मतम्। तार्किकानान्तु शब्दसमवायिकारण-तयाकाशपदप्रतिपाद्यं पदार्थान्तरमेव सिद्धेरत्, न तु वायुविशेषे शब्दा जायन्ते, तथा सति वायौ वातीन्द्रिये तेजोविशेषे ते जायन्ते इति कथं निश्चितम्? विनिगमनाविरहात्। एवञ्च शब्दसम-वायिकारणतया पदार्थे साधनीये तस्य नित्यत्वमेकत्वञ्च लाघवेन सिद्ध्यति, तदपि पदार्थान्तरमाकाशपदेनाभिलप्यते, "आकाश-वत्सर्व्वगतश्च नित्यः" इति महर्षिवाक्यबलेन "यथा सर्व्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते" इति गीतावाक्येन च तस्य विश्व-व्यापित्वमपि सिद्ध्यति, सौक्ष्म्यात् सूक्ष्मसादृश्यात्, सादृश्यञ्च तद्-भिन्नत्वे सति तद्गतधर्म्मरूपं, स च धर्म्मो निरवयवत्वं, नोपलिप्यते-ऽपरवस्तुसत्त्वप्रतिरुद्धसत्त्वं न भवति। अतएव विश्वव्यापिनां बहूनां विभूनां सर्व्वत्र सत्ताया न प्रतिरोधः एकैकद्रव्ये सर्व्वांशाव-च्छेदेन रूपरसादीनाञ्च। शब्दसमवायिकारणतयाकाशस्य तत्र नित्यत्वस्यैकत्वस्य च सिद्धावनुमानमपि। तत्पारिपाट्यं यथा शब्दो न वायोरुत्पन्नो गुणो, न वा चित्यतेजसां, गुणत्वव्याप्य-क्षणचतुष्टयावस्थायिवृत्तिजातिशून्यत्वात्, सुखदुःखद्वेषक्रिया-निखिलद्रव्यादिवत्। स च नात्मनां विशेषगुणो बहिःप्रत्यक्ष-विषयवृत्तिगुणत्वव्याप्यजातिमत्त्वात्, आत्मगतैकत्वद्वित्वादिपरि-माणबहिःप्रत्यक्षविषयनिखिलगुणवत्। नापि महाकालमहा-दिक्समवेत एकमात्रसमवेतप्रत्यक्षविषयत्वात् नापि गुणादिषट्-पदार्थान्यतमसमवेतः संख्यान्यगुणत्वात् गुणत्वाद्वा इत्यनुमानेन शब्दानां दर्शितवायुप्रभृत्यष्टद्रव्याद्यवृत्तित्वं साधयित्वा शब्दो द्रव्याश्रितो गुणत्वात् इति सामान्यतोऽनुमानात् दर्शिततरबाधानु-

संन्धानसहकारेण शब्दे यद्द्रव्यसमवेतत्वं सिध्येत् तदेवाकाशरूप-पदार्थान्तरम् ।

न च शब्दो भाकाशसमवेत इत्यप्यनुमितिः कथञ्चिद्धेतुना भवितुमर्हतीति शब्दो द्रव्याश्रित इति सामान्यतो व्याप्त्यानुमिति-विषयतया कथमाकाशः सिद्धेरदिति वाच्यम् आकाशस्य पूर्व्व-मसिद्धतया दर्शितसामान्यधर्म्मावच्छिन्नव्याप्तिनिश्चयकाले दर्शिते-तरबाधस्योद्भावयितुमशक्यत्वात् प्रोक्तानुमानत एव आकाशस्य सिद्धेः । अथ शब्दसमवायिकारणतयाकाशसिद्धिरिति यो नैया-यिकानामद्वैतवादिनाञ्च सिद्धान्तः स चापसिद्धान्त एव वेदात्मक-शब्दानां नित्यताया मीमांसकसम्मतत्वादिति वाच्यं तावतापि ध्वन्यात्मकशब्दानां तत्र जननात् अपिच यावन्त एव शब्दा अनित्याः प्रत्यक्षविषयगुणत्वात् वहिःप्रत्यक्षविषयगुणत्वात् तादृश-गुणसमानाधिकरणविशेषगुणत्वाद्वा, मृदङ्गादिध्वनिवत् रूप-स्पर्शादिवच्च इत्यनुमानेन वेदात्मकशब्दानामपि जन्यत्वसिद्धेः । न च नित्यः शब्दो विशेषगुणान्तरासमानाधिकरणैकमात्रवृत्ति-गुणत्वादित्यनुमानेन शब्दानां नित्यत्वमपि साधयितुं शक्यते तस्मादनुमानद्वयमेवाप्रयोजकमिति वाच्यं लौकिकवाक्यानां ध्वनी-नाञ्च मीमांसकमतेऽपि जन्यतयोक्तहेतौ व्यभिचारापत्तेः । वस्तुतो ध्वनिलौकिकवाक्यभिन्नत्वमपि हेतौ प्रवेश्य व्यभिचारस्य वारयितुं शक्यत्वेऽपि ध्वन्यादीनां प्रत्यक्षार्थं यादृशी सामग्री क्लृप्तासीत्,लाघ-वेन तादृशसामग्र्या एव वेदात्मकशब्दप्रत्यक्षेऽपि नियामकत्व-कल्पनस्यौचित्येन वेदात्मकशब्दानामपि जन्यत्वस्यावश्यकत्वात् । अन्यथा वेदश्रवणार्थं कारणान्तरकल्पने महागौरवं स्यात् । यत्तु उत्पन्नः को विनष्टः क इत्यादिव्यवहारबलेन शब्दमात्रस्यैव

जन्यत्वं सिध्यतीति तत्तुच्छं तादृशव्यवहाराणां सन्दिग्धप्रमाणत्वात्।

"घट त्वं धर्म्मरूपोऽसि" इत्यादिवाक्यानां घटादेः "ब्रह्म हवि"-रित्यादिवाक्यानाञ्च हविःप्रभृतेः प्रशंसार्थवादतावत् "न कश्चिद्-वेदकर्त्तास्ति वेदस्मर्त्ता चतुर्म्मुख" इतिवाक्यस्याऽपि वेदानां प्रशंसार्थवादतैव। अतस्तद्वाक्यं दर्शितानुमानादेः सबलतां व्याहन्तुं कथमपि न प्रभवति। भ्रमरूपाया अपि भूतशुद्ध्यर्थं चतुर्व्विंशतितत्त्वभावनायाः शास्त्रीयत्वेन तस्यां प्रवृत्तिदार्ढ्यार्थं साङ्ख्यदर्शनविचारवत्, मन्त्रेषु परमश्रद्धार्थं तेषु देवत्वस्य बाधितत्वेऽपि तत्र तत्संस्थापकविचारवच्च वेदधाराणां जन्यत्वेऽपि तद्-विहितकर्म्मणामनादिप्रसिद्धताज्ञाननिबन्धनप्रवृत्तिदार्ढ्यार्थं मीमांसकैर्वेदानां नित्यताविचारः कृतः। तावता न पदार्थः सिध्येत् तत्सिद्धिस्तु तर्कानुमानतो विधिवाक्यतो विवादानास्पदव्यवहारतः प्रत्यक्षतश्च भवितुमर्हति न त्वपरेण केनाप्युपायेनेति सूक्ष्मदर्शिनां सिद्धान्तः। परे तु न कश्चिदितिवाक्यस्य विधिवाक्याद्यात्मक-वेदधाराया वीजाङ्कुरवत् सजातीयवाक्यपूर्व्वकत्वनियमेन वेद-कृतीनां प्राथम्यस्यालीकतया प्राथमिकवेदकर्त्तुरलीकतायां तात्-पर्य्यं प्राथम्यञ्च स्वसजातीयध्वंसाकालीनत्वम्। पूर्व्वसर्गे यादृ-शार्थतात्पर्य्येण यादृशवाक्यात्मकविधिवाक्यानि प्रयुक्तानि प्रति-सर्गान्तरं तानि स्मरन् तादृशार्थक-तत्सजातीयवाक्यान्येव सृजति विश्वस्रष्टा न तु कविकाव्यादिवत् नवीनार्थतात्पर्य्यकाणि नवीन-वाक्यानीत्येव वेदस्मर्त्ता चतुर्म्मुख इत्यंशेन प्रतिपादितम्, "ॐकार-श्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तस्मा-

माङ्गलिकावुभौ" ॥ इतिवाक्यप्रतिपादितब्रह्मवदनोद्भूतप्रणववत् परमेश्वरशङ्करमुखोदितानां रां क्लीं क्रीं हूं प्रभृतिनिखिलमन्त्राणामपि सकर्त्तृकत्वं शब्दमात्रस्यैव जन्यत्वात्। परन्तु तत्तन्मन्त्रधाराया अनादित्वेन तत्तन्मन्त्राणां प्रथमकृतिः कस्मिन्नपि न प्रसिध्यति प्राग्दर्शितप्राथम्यस्य तस्यामप्रसिद्धत्वादिति शास्त्रमीमांसाविज्ञव्वास्तिकस्यानुमतम्। तत्त्वमसि श्वेतकेतवित्यादि बहुतरवाक्यानि पुनर्वेदांशा अपि सादिभावापन्ना एव इति प्राहुः।

गगनस्यानादित्वं "यथा सर्व्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते" इति भगवद्वाक्यबोधितसर्व्वगतत्वहेतुना साधनीयम्, अनादेरेव सर्व्वगतत्वात्, अन्यथाकाशस्य सादित्वरूपजन्यत्वे तदन्यसृष्टिधाराया अनादित्वेन कथमाकाशस्य सर्व्वगतत्वं सम्भवेत्। एवम् "आकाशवत् सर्व्वगतश्च नित्यः" इति प्रमाणबोधितसर्व्वगतत्वनित्यत्वव्यवहारविषयत्वरूपहेतुभ्यां लाघवेन च अनाद्यविनाशित्वरूपनित्यत्वस्य लाघवेन एकत्वस्य च सिद्धौ को विवादः। एतेनाऽद्वैतवादोऽपि निरस्तः। वायुश्च शब्दानां पुनर्निमित्तकारणं भवतीति निर्व्वातदेशावच्छेदेन शब्दानां नोत्पत्तिः। परे तु शक्त्या, व्युत्पत्तिविशेषबलेन वा आकाशपदाच्छब्दविशिष्टस्यैव शाब्दविषयत्वमतस्तत्रोत्पन्नत्वस्य बाधितत्वेन "सविशेषणे विधिनिषेधौ विशेष्ये बाधिते सति विशेषणमुपसंक्रामत" इति व्यवस्थाबलेन विशेषणीभूतशब्द एव तस्यान्वयं स्वीकृत्य मुनिवाक्योपपत्तिः सम्भवेत्। अतएव "शिखो विनष्टः पुरुषो न नष्टः" "एकतारं नभो नैव द्रष्टव्यं सुखमिच्छते"त्यादि-बहुविधवाक्यानां स्वारसिकत्वोपपत्तिरिति प्राहुः। विद्यारण्यमुनिप्रणीतसन्दर्भेण कृतः परमेश्वरस्य जगत्कर्त्तृत्वं प्रतिपादितम् इति तार्किकाणां व्यवस्था।

एवञ्च गगनादौ जन्यत्वसाधनार्थम् अद्वैतवादिरोदनं किं फलमर्ज्जयेत्? दर्शितमहावाक्यनिचयेन परमाणूनारभ्य द्व्यणुकादिक्रमेण जगदुपादानत्वमपि सुस्पष्टं प्राप्यते, अन्यथा परमाणुस्वीकारस्यानर्थक्यप्रसङ्गात्, एवं तत आरभ्य इत्यंशस्य उन्मत्तप्रलपितत्वापत्तेः।

अथोपादानयोरांशिकसंयोगेनैवोपादेयभूतवर्गं उन्नतिं भजते इत्येव दृश्यते एवञ्च परमाणूनां निरवयवत्वेनांशाभावात् कथं तद्द्वयसंयोग उन्नतभावापन्नं कार्य्यमर्जयेत्? सुतरां तेषामप्रामाणिकतेति चेन्न, दर्शितमहावाक्यप्रणेतृसर्व्वज्ञैर्महर्षिकणादैर्भगवद्व्यासपादैश्च परमाणुषु द्रव्योपादानतायाः स्वीकृतत्वेन विद्यारण्यमुनि-स्वहस्तितत्वेन च अवश्यमेव तैर्निरवयवद्रव्येष्वपि द्रव्यासमवायिकारणीभूतसंयोगोऽङ्गीकृतः। अन्यथा परमाणुस्वीकारवैफल्यापत्तिः, अतएवाभिज्ञैरनुमीयतां दिग्विशेषावच्छिन्नसंयोग एव कार्य्यमर्ज्जयति न तु तत्रांशविशेषावच्छिन्नत्वमपि नियामकम्। परमाणुषु तादृशसंयोगा जायन्ते एव इति तार्किकाणां व्यवस्था। इदमप्यतीव रहस्यं, दृष्टद्रव्यसंयोगेष्वंशविशेषावच्छिन्नेष्वेव द्रव्यजनकत्वं दृष्टातीन्द्रियस्थले तादृशसंयोगासत्त्वं सम्भाव्य परमाणुसंयोगानाम् अंशविशेषावच्छिन्नत्वासम्भवेन तेषु द्रव्यजनकत्वं कथमपि न हि सम्भवति, सुतरां परमाणवोऽपि न सिध्यन्तीत्यवधारणं यः करोति स च स्वस्मिन् सर्व्वज्ञत्वाभिमानी ब्रह्मणि जगदुपादानत्वं कथं निश्चिनुयात् तेन कुत्र तद्दृष्टान्तो दृश्यते। अथ महावाक्यमहिम्नैव तत्सिध्येदिति चेत् परमाणुसिद्धौ तेषु द्रव्योपादानत्वसिद्धौ च महावाक्यानां युक्तीनाञ्च किं दुर्भिक्षतास्ति? परन्तु तत्साम्राज्यस्यैव दर्शितत्वात्, तस्मात्

दिग्विशेषावच्छिन्नसंयोगा एव द्रव्यहेतवो भवन्ति न तु तादृश-कारणत्वे संयोगगतमंशविशेषावच्छिन्नत्वं नियामकम्,अलमित्यति-विस्तरेण। लौकिकव्यवहारेण तर्करूपोपजीव्येनाम्नावाक्येन च ये ये पदार्था अवधारिता आसन्, तद्विपरीतार्थपरत्वं न कस्याप्यर्थवादस्य, सुतराम् उपनिषद्वाक्यस्यापि, अतएव तेषां शाब्दजनकत्वेऽप्यगृहीतग्राहकत्वरूपप्रामाण्यं नास्ति इति सकल-व्युत्पन्नानां सिद्धान्तः, स च जैमिनिमुनिनापि स्वकृतसूत्रेण प्रदर्शितः। अर्थवादेभ्यः पदार्थसिद्धिर्दूरत आस्तां, तेषां शाब्द-बोधजनकत्वमेव नास्तीति गुरुप्रभृतिमीमांसकमतम्। अतएवा-नाहार्य्यबोधजनका अपि केचन अर्थवादाः सिद्धार्थाविरुद्धतात्-पर्य्यका एव भवेयुर्यथा "आयुर्घृतम्" इत्यादि। सूत्रात्मकार्थवादा अपि सिद्धबोधका एव, अतएव "सिद्धानुगममात्रं हि युक्तं कर्त्तुं परीक्षकैः। न सर्व्वलोकसिद्धस्य लक्षणेन निवर्त्तनम्" इति प्राचीनगाथा। केचन ते अबाधितार्थका इव बाधितार्थका अपि, अविशेषेण विधिनिषेधोत्थापका इत्यादेर्व्विस्तारेण विवरणम् एतद्ग्रन्थ एव प्राक् प्रदर्शितं, वाक्यश्रवणमात्रेणार्थावधारणमुप-हासास्पदमात्रम्। "मातृयोनिं परित्यज्य विहरेत्सर्व्वयोनिषु" एतच्छिवोक्तिश्रुत्यैव किं कार्य्येषु प्रवर्त्तते। पीयूषतुल्यफलदा वेदोक्तिर्यदि शोधिता। नोचेत्पारदवत्सैव गरलानि समुद्गिरेत्॥ इदं पुनरवधेयम् उपनिषद्वाक्यानांदर्शितप्रामाण्यं मास्तु, तथापि तानि शिष्टानामिष्टार्थमुदितान्येव। अन्यथा तत्तद्वाक्यं भ्रान्ति-दोषशून्याप्रतारकपुरुषप्रणीतं न स्यात्। अस्मद्गुरुपरम्परा-प्रचलितेयं शास्त्रमीमांसा, तामाश्रित्य ग्रन्थोऽयं प्रणीतः।

सकलोपनिषदादिवाक्यार्थपर्य्यालोचनयैतदेवावधारितं, तानि

वाक्यानि बहुविरुद्धधर्म्मैरपि ब्रह्मभावनारूपामेव तदुपासनां कैवल्योपयोगितयावगमयन्ति, अतएव "नृणामेको गम्यस्त्वमसि पयसामर्णव इव" इति परमभक्तस्योक्तिरपि। शिष्टानां प्रवृत्ति-निवृत्तिविषयक्रियोपदेशस्यैव भगवतो वेदप्रणेतुरभिप्रायविषयत्वेन भावना तु प्रमारूपा भ्रमरूपा वा भवतु तावता न कस्यापचयमादधाति प्रमैव फलं जनयेत् न तु भ्रम इत्यनियमात्। तथा नियमे भगवत्परिगृहीतमूर्त्तेरसाक्षात्कृतवतामस्मदादि-महर्षिपर्य्यन्तानां प्रतिपुरुषं जायमानविषमभावना फलविधायिनी न स्यात्। न ह्येकैकसाधकं प्रति प्रतिक्षणं परमेश्वरः प्रतिपुरुषध्यानकल्पितमूर्त्तीः परिगृह्णाति। ईदृशभावनास्थले सर्व्वेषां भावना किं प्रमारूपेवायाता सा च न किं पुनरिष्टचयं जनयेत्। अतएव मन्त्रात्मदेवतावादिमीमांसकाः साकारपरमेश्वरध्यानविधायकविधिवाक्यमहिम्ना तादृशध्यानं कर्त्तव्यतयाङ्गीकृतवन्तः। एतेन ' सांख्योक्तचतुर्विंशतितत्त्वानां पारमार्थिकता भवतु मा वा, तथापि भूतशुद्धौ तादृशचतुर्व्विंशतितत्त्वभावनाया अभ्युदयसाधकतया शास्त्रप्राप्तत्वेन सापि शिष्टैरनुष्ठीयते, तच्च चोत्कटप्रवर्त्तनार्थं सांख्यदर्शनं कृतम्। एवं शरीरान्तर्गतषट्चक्रादिशिरोऽवस्थितसहस्रदलकमलादीनां यन्त्रादिकं सहायीकृत्य शरीरान्तर्गतसूक्ष्मतत्त्वदर्शिना निपुणतरेण केनापि कदाप्यदृष्टचरत्वेनालीकत्वेऽपि तद्भावनापरं तन्त्रशास्त्रमपीत्यपि समाहितम्। एवंरीत्यैव दुष्क्रियाजन्यपापानाम् आत्मगुणत्वेऽप्यतीन्द्रियत्वेऽपि च "वामकुक्षिस्थितं पापं पुरुषं कज्जलप्रभम्" इत्याद्यसंख्यध्यानबोधकवाक्यान्यपि सङ्गमनीयानि। पदार्थतत्त्वनिर्णयस्तु सूत्रेण सत्तर्कानुमानेन च भवेत् न तु भावना-

बोधकवाक्यशतेनापि, न वार्थवादलक्षेणापि चिरप्रचलितव्यवहारानुमानसिद्धानां विरुद्धार्थसिद्धिर्भवेदित्यास्ताम् ।

पदार्थनिरूपणे न्यायविदां सिद्धान्तः । यावद्विषयेभ्यः प्रायशस्तद्विषयकज्ञानेच्छाकृतिद्वेषाश्च पृथग्भावापन्ना एव विषयविषयिणोः परस्परं विभिन्नत्वात् । न च बुद्ध्यादीनां तदाकारत्वमेव स्वीक्रियते, न तु बुद्ध्यादयो विषयेभ्यो भिन्ना आकारत्वञ्च विषमभावापन्नानां तादात्म्यं मृत्तिकादौ घटाद्याकारत्ववदिति वाच्यं तथा सति मृत्तिकेयं घटो भविष्यतीत्यादिवत् बुद्धिरन्तःकरणं मनो वा घटो भविष्यतीत्यादिप्रयोगस्य दुर्व्वारतापत्तेः । एतेनाद्वैतवादिमतं तेषामेव मतमस्तु, न तु व्यवहारविदाम् । अपरञ्चाद्वैतवादिमतं परमेश्वरज्ञानविषयघटपटादय इव जाग्रदवस्थासु रौप्याकारशुक्ति-सर्पाकाररज्जुप्रभृतयः स्वप्नावस्थासु च वहिर्वस्तुसजातीयाकारास्तद्विषमाकारा वाऽसङ्ख्यपदार्था जायन्ते बुद्धिषु यदाकारत्वं स्थास्यति तत्सर्व्वमेव पदार्थतया व्यवह्रियत इति नियमात् । अयञ्च विशेषः केषाञ्चित्पदार्थानां व्यावहारिकं सत्त्वं केषाञ्चित्प्रातिभासिकं सत्त्वं केषाञ्चिच्च स्वाप्निकं सत्त्वम्, इदमुपलक्षणं बहूनां ध्येयत्वनिर्म्मितं सत्त्वं कदाचिदप्यज्ञातानामतिभीषण-परमसुन्दरकलेवराद्याकारत्वस्य ध्यानावस्थितत्वात् । एतन्मतं समीचीनं भवेच्चेद्भवतु, इदानीं कतिपयश्लोकाः स्मृतिपथमारोहन्ति । यथा,—

भार्य्यात्वभ्रमविषये सुतायाञ्चेत् स्वदारता ।
तात्कालिकं तया सार्द्धं मैथुनं स्यादपातकम् ॥
स्वप्नजातेषु वस्तुत्वं सिध्येत् सूक्ष्मधियां यदि ।
तदा स्यात् जाह्नवीस्नानात् स्वाप्निकात् पापमोचनम् ॥

अद्वैतवादिनिर्णीता स्वप्नभ्रान्तेऽपि वस्तुता।
तन्मते न कथं पापं स्वाप्निकद्विजहत्यया॥
जीवनोन्नतिनाशौ च स्यातामद्वैतवादिनाम्।
स्वप्नावस्थासमुत्पन्नपीयूषविषपानतः॥

तेषामयमपि सिद्धान्तः। उपाधिविशेषावच्छिन्नेऽपि स्वस्मिन् तत्तत्पदार्थनिरूपितस्थितत्वाद्यन्वयो न व्युत्पत्तिसिद्धः परन्तु तयोरभेदान्वय एव। अतएव विवरविशेषरूपोपाध्यवच्छिन्नाकाशस्यैव कर्णपदवाच्यत्वेन कर्णेन्द्रियाख्याकाशस्थितानीति न प्रयुज्यते परन्त्वाकाशः कर्णेन्द्रियाणीत्येव, अद्वैतमते उपाधिविशेषावच्छिन्नब्रह्मण एव जीवपदार्थतया जीवा ब्रह्म इत्येव प्रयोगो भवेत्, न तु जीवा ब्रह्मणि स्थिता इत्यपि। एवञ्च सर्व्वं खल्विदं ब्रह्मेति वाक्यशतसत्त्वेऽपि मत्स्थानि सर्व्वभूतानीति वाक्यं भगवता कथं प्रयुक्तम्, एतावता भगवान् न व्युत्पन्न इत्येव किमद्वैतवादी ब्रूयात्। न चान्यत्राभेदस्थले स्थितत्वादिप्रयोगासम्भवेऽपि उपादानोपादेयानामभेदे सत्यपि उपादेयेषूपादानस्थितत्वाद्यन्वयो नैयायिकैरपीष्यते, एवञ्च ब्रह्मणो जगदुपादानत्वेन जगति ब्रह्मस्थितत्वाद्यन्वयो नाव्युत्पन्न इति वाच्यं ब्रह्मणि विश्वोपादानतायाः प्रमाणापरिचितत्वात् दर्शितव्यासोक्ततर्कसूत्रेण निरस्तत्वाच्च। एवं सूत्रे मणिगणा इव इति दृष्टान्तं प्रदर्श्य भगवता ब्रह्मतत्त्वनिरूपणेन भूतजातभूतभावनयोः परस्परपार्थक्यरूपप्रकृततत्त्वे विवादलेशस्याप्यसम्भवात्, अन्यथा दृष्टान्तप्रदर्शनं वैफल्यमापद्येत मणिसूत्रयोरत्यन्तभेदस्य सर्व्वजनसिद्धत्वात्। अपिच “यो लोकत्रयमाविश्य बिभर्त्त्यव्यय ईश्वर” इति भगवद्वाक्यमपि जगतां ब्रह्मानात्मकत्वं सुस्पष्टमेवावगमयति बिभर्त्ति इत्यंशेन

पतनविरोधिव्यापारप्रयत्नस्यैव भगवति लाभात् पतनं हि अधः-संयोगः घटादिब्रह्मस्वरूपत्वे ब्रह्मणः सर्व्वव्यापित्वेनाधःस्थानाप्रसिद्ध्या घटादिव्यवहारोपयोग्युपाध्यवच्छिन्नस्यापि तस्य पतन-व्यवहारासम्भवात् अन्यथा श्रवणेन्द्रियस्य सर्व्वगतगगनात्मकस्य शरीरपातदशायां श्रवणेन्द्रियं पततीतिप्रयोगविषयत्वापत्तेः । न च गुरुत्वे सत्यधःसंयोग एव पतनं तच्च श्रवणेन्द्रिये नास्त्यतो न तत्र पतनव्यवहार इति वाच्यं विद्युदादौ पातादिव्यवहारस्य दृष्टत्वेन पतनपदार्थे गुरुत्वनिवेशस्यासम्भवात् । तस्मात् जन्यपरिमाण-वत्त्वं पतनप्रयोजकमित्येव नियमः स्वीक्रियते, न तु अद्वैतवादि-स्वकपोलकल्पितव्यावहारिकपरिमाणमपि । तथा सति श्रव-णेन्द्रियस्यापि पातादिव्यवहारविषयताया दुर्व्वारतापत्तेः । वस्तुतः शङ्कराचार्य्यग्रन्थं समालोच्याभूतपूर्व्वव्यवहारकृतौ शक्तिं लब्ध्वा वयं कृतकृत्याः स्मः । स च व्यवहारोऽविद्याविशेषावच्छिन्नविश्व-व्यापिब्रह्मण एव पादपादिपदव्यवहारविषयत्वेन वृक्षात् पत्रं पतत्यविद्यावच्छिन्नब्रह्मणोऽविद्याविशेषावच्छिन्नं ब्रह्म पतति पटा-वच्छिन्नाकाशे घटावच्छिन्नाकाशः पततीत्यादिरूपः ।

इतः स्यात् तर्कविद्यायामनुरागविवर्द्धनम् ।
अद्वैतवादिगर्व्वस्य भवेदेतेन मर्द्दनम् ॥ १ ॥

वेदोक्तवाक्यणमथाप्यनुमानलेश-
मद्वैतवादबलदं न विलोकयामः ।
तस्मात् तथापि रसराशिपिपासवश्चे-
दाकाशसाररसं रसिकाः पिबन्तु ॥ २ ॥

अद्वैतवादरसिकस्याख्या नास्त्वत्र किन्ततः ।
जलौकसामनास्वादाद्-रसालं किं घृणास्पदम् ॥ ३ ॥

शैत्यमाधुर्य्यवैधुर्य्यदोषश्चेदवधार्य्यते।
विनावगाहपानाभ्यां तरङ्गिण्यास्तु तेन किम्॥ ४॥
यो यत्कर्म्म करोति यो वदति यद्गच्छन् वसन् वा स्वपन्
भो विश्वेश गिरीश तान् निजसुतान् तानि त्वमेव प्रभो।
नित्यं कारयसीति किञ्चिदपि नो सम्भावि जीवेच्छया
तस्माद्वैतनिरूपणादजनि चेद्दोषः स मे मार्ज्यताम्॥ ५॥
अद्वैतावगतौ यथास्ति वचनं द्वैतप्रतीतौ तथा
भ्रान्ताः किन्तु वयं ततो भव भवत्तत्त्वस्य निर्द्धारणम्।
अप्रमत्तो न हि सम्भवेद्दत तथाप्येतद्विचारच्छलात्
त्वन्नामोक्तिशतं कृतं ननु कथं नश्येन्न तस्मादघम्॥ ६॥

साकारोपासनायाः साक्षान्मुक्तिकारणत्वविचारः।

अनुसृत्य प्रचलितां रीतिमेतद्विचारितम्।
किन्तु नः परमा प्रीतिः शिष्टजुष्टेषु कर्म्मसु॥

वयन्तु यथाज्ञानं मोक्षोपायं व्यवस्थापयामः। मुक्तिप्रयोजकतत्त्वज्ञानबोधकभगवत्श्रीकृष्णोक्तौ प्रायशः सर्व्वत्रास्मच्छब्दप्रयोगदर्शनेन अस्मच्छब्दस्य तु प्रयोक्तृशरीरावच्छिन्नात्मनि शक्तत्वेनाद्वैतवादिमते मां ज्ञात्वा कैवल्यं लभत इति चाण्डालाद्युक्त्यसम्भवेन च साकारपरमेश्वरोपासनाया एव मोक्षोपायत्वमवधार्य्यते, "वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।" "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय॥" इत्युप-

निषद्वाक्येनापि तथैव प्रतिपादितत्वात्; यत एतद्वाक्यपूर्व्वपाद-द्वयेन तेजस्विब्रह्मोपासनां व्यवस्थाप्य तदुत्थाप्याया-एतज्ज्ञानात् किं फलं लभत-इत्याकाङ्क्षाया निवृत्तये तमेव विदित्वेत्यादिकं प्रयुक्तम्। तमेवेत्याद्यंशस्य निराकारब्रह्मोपासनापरत्वे आदित्य-वर्णमित्यादिप्रयुक्तिर्वैफल्यमापद्येत तच्छब्दस्याप्रक्रान्तपरत्वकल्पना-पत्तिश्च। अतएव "मुक्तिमिच्छेज्जनार्द्दना"दिति "मोक्षकामो-ऽर्च्चयेद्धरि"मिति च वाक्यम्। सकलप्राणिनां निर्व्वाणार्थं वारा-णसीनिर्म्मातुस्तेजःकलेवरधरविश्वेश्वरस्य परिज्ञानमपि मोक्षोपाय-इत्यवधार्य्यतामादित्यवर्णं तमसः परस्तादिति प्रदर्शितत्वात्। ब्रह्मणः शुभ्रतेजोमयशिवशरीरधारित्वं तादृशाकारधारित्वेनात्म-ज्ञानं निर्व्वाणकारणमिति च मुण्डकोपनिषदपि प्रमापयति यथा, "हिरण्मये परे कोषे विरजं ब्रह्म निष्कलम्। तच्छुभ्रं ज्योतिषां ज्योतिर्यद्वदात्मविदो विदुरिति॥" अस्य भावार्थः—हिरण्मये परे कोषे सुवर्णवत्तेजोविशिष्टसर्व्वोत्कृष्टस्थानविशेषे। विरजं मालिन्यदोषरहितं मिथ्याज्ञानजवासनादिशून्यमिति यावत्, विगतो रजो यस्य इत्यस्य विग्रहः सर्व्वे सान्ता अदन्ता इत्यनु-शासनबलेन रज इत्यदन्तशब्दः, पिण्डं दद्याद्गयाशिरे इत्यादि-वत्। निष्कलं कलाशून्यं, कला तु भागः अवयव इति यावत्, एतेन ब्रह्मणो नित्यत्वं सूचितं, नित्यद्रव्यमात्रस्यैव निरवयवत्वा-दिति भावः। एवम्भूतं ब्रह्म आत्मविदो जना यद्विशिष्टमर्थात् यद्विशिष्टत्वेन जानन्ति तच्छुभ्रं ज्योतिषां ज्योतिः। एतद्वाक्य-स्थितात्मविदो विदुरित्यंशस्वरसात् जातब्रह्मतत्त्वज्ञानानां तादृशं-साकारज्ञानमेव उदेष्यति इत्यवधारितम्। विश्वव्यापकमपि शालग्रामशिलावाणलिङ्गादौ विशेषावस्थितमिव काशीयमासीत्

सुवर्णमयीति चिरप्रवादप्रसिद्धसुवर्णतेजोमयकाशीकैलासादिरूपकोषे चिरविराजमानं ब्रह्म यद्यदर्थात् यदाकारविशिष्टमात्मविदो जातात्मतत्त्वज्ञाना विदन्ति स च आकारः अर्थात् शरीरं सर्व्वतेजसां प्रधानं भास्वरशुक्लरूपविशिष्टं रजतगिरिनिभमिति यावत्। एतेन शिवाकारित्वरूपपरमतत्त्वेन ब्रह्मज्ञानमेवात्मतत्त्वज्ञानदशायां जायत इति मुण्डकोपनिषत्तात्पर्य्यार्थमवधारयामः।

क्वचित् पुस्तके "तद्यदात्मविदो विदु"रिति पाठोऽपि दृश्यते। ईदृशवाक्यार्थस्यापि पूर्व्वोपदर्शितयद्यदात्मविदो विदुरित्यंशघटितवाक्यार्थ एव पर्य्यवसानम्। तथाहि प्रथमतत्पदं ब्रह्मतात्पर्य्यकं, द्वितीयतत्पदन्तु प्रकान्तशरीरतात्पर्य्यकम्; इत्यञ्च तत्प्रसिद्धं विरजं निष्कलं ब्रह्म यच्च शुभ्रं तेजोमयशरीरं तदुभयं जातब्रह्मतत्त्वज्ञाना जानन्ति। एतेन शुभ्रतेजःशरीरित्वेन ब्रह्मज्ञानमेव ब्रह्मतत्त्वज्ञानमित्येवायातम्। अन्यथा तत्पदद्वयवैयर्थ्यम्, एकतत्पदसत्त्वेनैव चरितार्थत्वसम्भवात्। घटत्वेन घटज्ञातृपुरुषतात्पर्य्येण घटत्वं घटञ्च जानाति इत्यभिलापवत् तादृशतेजोमयशरीरित्वेन ब्रह्मज्ञातृपुरुषतात्पर्य्येणापि उपनिषद्वाक्यप्रयोगो नासङ्गतः। अद्वैतवादिनस्तु शुभ्रं तेजःस्वरूपं निष्कलं ब्रह्म आत्मविदो जानन्ति इति व्याचक्षते। तन्न समीचीनं; तन्मते ज्ञानानन्दस्यैव ब्रह्मतया तत्र तेजस्त्वस्य शुभ्रत्वस्य उपनिषदन्तरप्राप्तरक्तत्वपीतत्वयोश्च अत्यन्तासम्भवात्। कोषेण व्यवहारेण च तयोर्ज्ञानतेजसोः पार्थक्यप्रतिपादितत्वात्। एवं ब्रह्मणो रूपवत्त्वस्य उपनिषद्बाधितत्वात्। उपनिषद्यथा,—अशब्दमस्पर्शमरूपमव्ययमित्यादि। अपि च तत्पदद्वयप्रयोगस्य व्यर्थतापातात्। घट-

पटादिवत् शुभ्रतेजोविशेषस्याऽपि ब्रह्मविकारत्वमद्वैतवादिभिर्व्यव-स्थापितम्, एवञ्च तादृशविकृतब्रह्मचिन्तनेऽतिपरम्परया मुक्तावुप-योग इत्येवोपनिषत्तात्पर्य्यविषयः, दुःखनिवृत्तिरूपमोक्षे साक्षा-त्कारणन्तु निराकारचिन्तनमेवेत्यपि व्यवस्था भवितुमर्हति, न तु साकारत्वजगत्कर्त्तृत्वादिरूपसकलधर्म्मेण ब्रह्मचिन्तनं साक्षात् तदुपयोगीति खप्नलब्धाशङ्का यदा पश्यः पश्यते रुक्मवर्णमित्यादि-वचनस्य व्याख्यामभिज्ञमुखादाकर्ण्य निवर्त्त्यताम्। एवं निरा-कारत्वेन ब्रह्मचिन्तनमाकाशकुसुममेवेति वयं जानीमः। अत-एव "चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः। उपासकानां कार्य्यार्थं ब्रह्मणो रूपकल्पना" इति परमवाक्यमपि। चिन्मयस्येति इच्छामय करुणामय-सुखमयी निशेत्यादिवत् स्वारसिकम्।

इत्यञ्च मुमुक्षुभिः प्रायशः सर्व्वैरेवास्मत्ष्टैः प्रतिदिनं शिवाराधन-मेव क्रियत इति वेदमन्त्रादप्यवगम्यते यथा, "त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनमुर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृता"दिति। "शिवे च परमेशाने विष्णौ च परमात्मनि। अभेदबुद्ध्या वर्त्तेत भेदकृन्नरकं व्रजे"दित्यपि वाक्यम्। ब्रह्मणस्तेजःशरीरधारित्वे प्रमाणान्तरमपि, "निर्दग्धुं निखिलाः पलाशसमिधो मध्यादयोध्या-रणेराविर्भूतमभूदपूर्व्वविभवं यत्किञ्चिदेकं मह" इति। अपिच "यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिम्। तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति॥" एतन्मुण्ड-कोपनिषद्वाक्येन तेजःशरीरधारिब्रह्मोपासनया पापपुण्यक्षयस्तदु-त्तरं कैवल्यलाभ इति एवं सादृश्ये मुख्यार्थकसाम्यपदेन कैवल्यं ब्रह्मसादृश्यरूपं न तु ब्रह्मस्वरूपता इत्यपि स्पष्टं प्रतिपादितम्। एतदुपनिषद्भावार्थस्तु पश्यः पश्यद् ब्रह्मभूतः प्रसन्नात्मा तत्त्वमसि

श्वेतकेतवित्यादिवत् प्रथमतः स्वस्मिन् ब्रह्माऽभेदाध्यारोप्यमानस- प्रत्ययस्याश्रयः। तदुत्तरं "यावान् यश्चास्मि तत्त्वतः" "ततो मां तत्त्वतोज्ञात्वा" "तज्जलानिति शान्त उपासीत" इत्यादिवत् सुवर्णवर्णविग्रहविशेषधारित्वेन विश्वकर्तृत्वेन सर्वविषयकज्ञान- वत्त्वरूपपरमब्रह्मत्वाद्यात्मकेन च प्रकृततत्त्वेन पश्यते यथार्थज्ञान- वान् भवति अतएव पश्यः पश्यते इति पदद्वयसार्थक्यमन्यथा तदेक- तरप्रयोगेणैव सामञ्जस्यं स्यात्। न हि पाचकः पचति भुञ्जानो भुङ्क्ते इत्यादिकं व्युत्पन्नैः प्रयुज्यते। साकारत्वं विहाय केवल- जगत्कर्तृत्वादिना ब्रह्मचिन्तनस्य कैवल्योपयोगिपापादृष्टक्षयहेतुत्वे रुक्मवर्णमितिप्रदर्शनस्य वैफल्यं स्यात्। विश्वकर्तृत्वेन ब्रह्म- चिन्तनस्य निखिलादृष्टनाशकतायाः सुस्पष्टप्रतिपादिततया पुनः किमाकारब्रह्मज्ञानमद्वैतवादिमते निःश्रेयसं जनयेदिति विज्ञातुं वयं न प्रभवामः। किञ्च कैवल्योपायीभूतब्रह्मभावनायाः साकारत्वस्याविषयत्वे क्वचिदुपनिषद्वाक्ये रुक्मवर्णं क्वचिदादित्य- वद्रक्तवर्णं क्वचिच्च शुभ्रवर्णमित्यादिप्रयोगः कथं सङ्गच्छते। पर- मते विज्ञानानन्दस्वरूपब्रह्म किं दर्शितनानावर्णतेजोमयं भवितु- मर्हति, धन्यमेवाद्वैतवादिनां ब्रह्मनिरूपणम्। दर्शितोपनिषद्- वाक्यस्थरुक्मवर्णमित्यंशेन ध्येयः सदा सवितृमण्डलमध्यवर्त्तीति ध्यानविषयहिरण्मयवपुर्ब्रह्मचिन्तनं निर्व्वाणोपयोगितया प्रति- पादितं, गोस्वामिनस्तु गौराङ्गदेवचिन्तनमपीति वदन्ति। शास्त्रार्थ- तत्त्वविदस्तु जटाजूटसमायुक्तामित्यादि नानाविधध्यानप्रासतस- काञ्चनकलेवरधारित्वेन ब्रह्मचिन्तनमपि मोक्षोपायः, अतएव ब्रह्मयोनिमित्यंशोऽपि सुसङ्गतः, अस्यार्थः ब्रह्मणोऽर्थात् प्रजापते- र्योनिरुत्पत्तिस्थानं, शक्तिशरीरधारिब्रह्मणि प्रजापतिसृष्टिकर्तृत्वे

प्रमाणं यथा ऋग्वेदीयदेवीसूक्तम् "अहं सुवे पितरमस्य" इत्यादि। पश्य इत्याद्युपनिषत्स्थितकर्त्तारमित्यंशभावार्थस्तु प्रजापत्युत्पादनद्वारा जीवशरीरादिसर्व्वभूतकर्त्तारमतो ब्रह्मयोनिं कर्त्तारमित्यंशद्वयमप्यर्थवद्भवतीति प्राहुः। एवञ्च कदा पुनर्निराकारोपासनायाः कर्त्तव्यता इति न जानीमहे।

दर्शितपुंशरीरधारिण इव कालिकादिकलेवरधारिणस्तस्योपासनापि मोक्षोपायः "श्रीरामस्तारिणी साक्षात्कृष्णरूपा च कालिका।" "सैषा प्रसन्ना वरदा नृणाम्भवति मुक्तये" इत्याद्यसंख्यप्रमाणदर्शनात्। प्रत्युत उपासकानां कार्य्यार्थं ब्रह्मणो रूपकल्पना इति वाक्येन स्पष्टमेव प्रत्याय्यते उपासकानां निखिलप्रयोजनसम्पादनार्थं ब्रह्मणो रूपधारणं, कैवल्यं हि न किं प्रयोजनान्तर्गतम्।

अयञ्च विशेष आशुतोषोपासना ह्यैहिकफलादिनिःश्रेयसान्तसकलशुभफलान्येवाशु विदध्यात्, अपरमूर्त्तिधरपरमेश्वरोपासना तु न तथेति। अतएव "आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात्। ज्ञानञ्च शङ्करादिच्छेन्मुक्तिमिच्छेज्जनार्द्दना"दिति वाक्यमध्ये ज्ञानञ्चेत्यंश एव चकारः प्रयुक्तस्तदन्यांशस्थितेष्वारोग्यधनमुक्तिपदघटितवाक्येषु स च न प्रयुक्तः तत्र 'च'शब्दस्त्वप्यर्थकोऽनुक्तसमुच्चायको वा। पर्य्यवसितार्थश्च तद्वचनोपात्तफलत्रयं ज्ञानमपि अथवा ब्रह्मतत्त्वज्ञानं वेदादिसर्व्वशास्त्रज्ञानम् अपरयावदिष्टञ्च शङ्करोपासनया लभते अनुक्तसमुच्चायकचकारेणेत्येव प्रतिपादितम्। दृश्यते च लोके ब्रह्मणः सृष्टिमारभ्य कैवल्यकामनया सन्न्यासिनो गृहस्थाश्च विद्वांसः सर्व्व एव वाराणस्यामाशुतोषमुपासते। विद्योन्नतिकामनया सर्व्वदेशेषु प्रायशः सर्व्व एव सुत-

कामनया तर्हि संजीवनकामनया चास्तिकचयः शिवलिङ्गमेवार्च्च-यति च। सर्व्वे एव निबन्धकाराः प्रायशः परात्परशङ्करानुरक्ता इति दृश्यते। उदयनाचार्य्यलिखनं—"जातिगोत्रप्रवरचरणकुल-धर्म्मादिवदासंसारप्रसिद्धानुभवे भगवति भवे सन्देह एव कुत" इति। गदाधरभट्टाचार्य्यलिखनम्—"अभिवन्द्य मुहुः समा-दरात् पदपाथोजयुगं पुरद्विष" इति। गौतमसूत्रवृत्ति-भाषापरि-च्छेद-तद्विवृतिकृद्विश्वनाथलिखनं—"चूड़ामणीकृतविधुर्वलयीकृत-वासुकिः। भवो भवतु भव्याय लीलाताण्डवपण्डित" इति। कि-मधिकं चिन्तामणिकृद्गङ्गेशोपाध्यायोक्तिरपि—"नमस्तस्मै कस्मै-चिदमितमहिम्ने पुरभिदे" इत्यादीनि बहूनि शिवभक्तिपराणि शिष्टनिकरस्पष्टवाक्यानि सन्ति। शङ्करः शङ्करः साक्षादिति प्रवादप्रसिद्धस्य विवेकदवदहनदह्यमानोन्नतविषमयविषयवासना-विषमबोधपादपस्यात्मतत्त्वनिरूपणार्थमतिवाहितचिरसमयस्य भग-वतः शङ्कराचार्य्यस्योक्तिमपि पश्यतु—

"अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा,
तृणे वा स्त्रैणे वा कुसुमशयने वा दृशदि वा।
मणौ वा लोष्ट्रे वा मम समदृशो यान्तु दिवसाः
क्वचित् पुण्यारण्ये शिव शिव शिवेति प्रलपत" इति॥

बालं व्यालजलानलादिभयतस्त्रातः शिवस्त्रायते
दुग्धञ्चापि शिशुप्रसूस्तनयुगे सृष्ट्वा शिवो रक्षति।
हन्ति श्रीशिव एव सर्व्वसमये भक्तस्य सर्व्वापदं
तस्मो जीव शिवः शिवः शिव इति ध्वानैर्धरा पूर्य्यताम्॥ १॥
श्रौतैः शोधितचेतसामिव सुरापाणां सुरद्वेषिणां
निस्ताराय परां पुरीं व्यरचयत्काशीं पुरारिः पुरा।

तस्मान्मित्र परत्र चापि परमं मित्रं शरण्यं शिवं
ज्ञात्वा नित्यशिवार्चनैः शिवशिवध्यानैर्दिनं याप्यताम् ॥ २ ॥
भूतं भावि च वर्त्तमानमपि यच्चोत्पादनं पालनं
तत्सर्व्वस्य शिवेन जात्वपि शिवाद्विश्वस्य विध्वंसनम् ।
तन्मूर्त्तिंचितये विराजितशिवस्याख्यां विमोक्षप्रदां
बम् बम् बम् प्रणवोदिताञ्च रुचिरामुच्चैः समुच्चारय ॥ ३ ॥

परमविवेकविध्वस्तविषयबोधेन शङ्कराचार्य्येण विविधकलेवर-धारिब्रह्मोपासनयैव चिरसमयातिपातः कृतः, न केवलं शिव-मुपास्य । परममूर्त्तिनिकरधारिपरमेश्वरस्याविशेषेणोपासनाया भवबन्धनविमुक्तिहेतुत्वस्य तेनावधारितत्वात् । तत्कृतमूर्त्त्यन्तर-धारिपरमेश्वरानुरक्तिसूचकः श्लोकोऽपि—

सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरणीं
विपद्यन्ते विश्वे विधिशतमखाद्या दिविषदः ।
करालं यत्क्ष्वेड़ं कवलितवतः कालकलना
न शम्भोस्तन्मूलं जननि तव ताड़ङ्कमहिमा ॥ इति ।

अविनयमपनय विष्णो दमय मनः शमय मम विषयरसतृष्णा-मित्यादि ।

एतावतैत्येवानुमितमविनष्टमोहं महान्तं यावन्तं प्रति प्रतिदिनं प्रातर्भावनोपदेशपर"अहं देवो न चान्योऽस्मि ब्रह्मैवाहं न शोक-भाक् । सच्चिदानन्दरूपोऽहं शुद्धमुक्तस्वभाववान् ॥" इति महर्षि-वाक्यं विश्वस्य तद्वाक्यबोधिताया अतात्त्विक्या अपि भावनाया मोहनिवृत्त्युपायतामवधार्य्य तादृशभावनाया दार्ढ्यार्थमनुक्षणं तामाश्रितवता शिवांशशङ्कराचार्य्येण मोहावस्थायामेवाद्वैतविचारः कृतः । निरन्तरतादृशभावनया मोहे निवृत्ते मोहप्रसूतविषय-

वासनाविषमजुहूषाद्युपरमेण परमेश्वरे परमभक्तिं लब्ध्वा साकारत्वादिपरमेश्वरपरमतत्त्वज्ञानमलभत स महापूरुषः। जीवादौ ब्रह्माभेदभावनोत्तरं परमभक्तिलाभस्य भक्त्युत्तरं यथोक्ततात्त्विकज्ञानलाभस्य च ब्रह्मभूतः प्रसन्नात्मेत्यादि-भगवद्वाक्येन प्रतिपादितत्वात्। न च सन्न्यासग्रहणमात्रेणैव मोहादिकमनश्यत्तस्येति वाच्यं, मण्डनमिश्रं प्रति जिगीषायाः परकायं प्रविश्य नृपतिपत्नीसम्भोगवासनाया वीराचारिणं प्रति प्रतिहिंसाचेष्टायाश्च चिरप्रवादप्रचलितत्वात् तासाञ्च मोहप्रयोज्यत्वस्य सर्व्वसिद्धत्वात्। अथवा दैत्यादिमोहनार्थं वेदादिविरुद्धवीराचारस्य भगवन्महादेवप्रणयनवत्कलेरुन्नतिचिकीर्षया शङ्करांशभूतेन शङ्करेणाद्वैतवादप्रणयनं कृतम्। तस्य वेदविरुद्धत्वे पद्मपुराणीयमागमीयञ्च विज्ञानभिक्षुप्रमुखप्राचीनभाष्यकारादिधृतवाक्यं यथा—

मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमेव च।
मयैव कथितं देवि कलौ ब्राह्मणरूपिणा॥
अपार्थं श्रुतिवाक्यानां दर्शयित्वातिगर्हितम्।
कर्म्मस्वरूपत्याज्यत्वमत्र च प्रतिपाद्यते॥
सर्व्वकर्म्मपरिभ्रंशान्नैष्कर्म्यं तत्र चोच्यते।
परात्मजीवयोरैक्यं मयात्र प्रतिपाद्यते॥
ब्रह्मणोऽप्यपरं रूपं निर्गुणं दर्शितं मया।
सर्व्वस्य जगतोऽप्यस्य नाशनार्थं कलौ युगे॥
वेदार्थवन्महाशास्त्रं मायावादमवैदिकम्।
मयैव कथितं देवि जगतां नाशकारणम्।
यस्य श्रवणमात्रेण पातित्यं ज्ञानिनामपि॥

शिवांशशङ्कराचार्य्यस्य दर्शितजिगीषादिकन्तु न खलु दोषत्वेना-

यापि, धर्म्मव्यतिक्रमो दृष्ट ईश्वराणाञ्च साहसम् । तेजीयसां न दोषाय वह्नेः सर्व्वभुजो यथेति प्रमाणस्य जागरूकत्वात् ।

वासुदेवाशुतोषदशरथात्मजश्रीरामचन्द्रकालिकाद्यन्यतमकलेवरधारित्वेन ब्रह्मचिन्तनं मोक्षोपाय इत्यवधार्य्यते दर्शितप्रमाणवाक्येभ्यः । परमेश्वरश्रीरामचन्द्रस्य भवच्छेदकारित्वे प्रमाणं यथा, "ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् । भृत्यार्त्तिहं प्रणतपाल भवाब्धिपोतं वन्दे महापुरुष ते चरणारविन्दम् ॥ त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्म्मिष्ठ आर्य्यवचसा यदगादरण्यम् । मायामृगं दयितयेप्सितमन्वधावद्वन्दे महापुरुष ते चरणारविन्दम् ॥" अथर्व्ववेदीयश्रीरामोपनिषदपि—

शृणुध्वं मामकीं वाचं भवबन्धविनाशिनीम् ।
एतेषु चैव सर्व्वेषु तत्त्वञ्च ब्रह्म तारकम् ॥
राम एव परं ब्रह्म राम एव परं तपः ।
राम एव परं तत्त्वं श्रीरामो ब्रह्म तारकम् ॥

एवञ्च ब्रह्मणः सृष्टिमारभ्य महर्षिप्रभृतयो यावन्त एव महात्मानः साकारपरमेश्वरमेवोपासितवन्त इत्येव पुराणादिसर्व्वप्रमाणादिभ्यः श्रूयते, न तु कोऽपि निराकारम् ।

न चासुरनिशाचरादिगोपगोपिकापाण्डवान्तानां बहूनामेव साकारपरमेश्वरदर्शनजननेऽपि सर्व्व एव ते न कथं कैवल्यमलभन्त इति वाच्यं, यतः साकारत्वज्ञानस्येव सर्व्वज्ञत्वविश्वसृष्टिस्थितिप्रलयकर्त्तृत्वरूपब्रह्मगतापरसकलज्ञानस्यापि "यः सर्व्वज्ञः सर्व्ववित्," "तज्जलान् इति शान्त उपासीत" इत्यादितः कैवल्योपयोगितया प्राप्तत्वेन निरुक्तसाकारत्वादिसकलधर्म्मप्रकारेण ब्रह्म-

ज्ञानमेव मुक्तिं जनयेत् न तु केवलसाकारत्वेन साकारत्वं विहाय सर्व्वकर्त्तृत्वादिमात्रेण वा इति सर्व्वशास्त्रमर्म्मज्ञोदयनाचार्य्यलिखनेनापि सुव्यक्तमवधार्य्यते यथा "शिवं प्रतिनमन् भूयासमन्तेष्वपि"। अस्य भावार्थः—मरणप्राक्कालपर्य्यन्तं शिवोपासनयैव मम कालयापनं भूयात्। तत्कृतकारिकान्तरञ्च "कार्य्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः। वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्यय" इति॥ एतत्कारिकया ब्रह्मणि सर्व्वकर्त्तृत्वं सर्व्वज्ञत्वञ्च प्रतिपादितम्। एतावता तन्मते शिवाकारित्वसर्व्वकर्त्तृत्वादिरूपसकलधर्म्मैरेव चिरनिरन्तरब्रह्मोपासनाया मुक्तिसाधनत्वं किं नायातम्। अन्यथा मरणान्तशिवाराधनव्रतपरायणस्य तस्य ब्रह्मणि सर्व्वकर्त्तृत्वादिप्रदर्शनं वैफल्यमापद्येत एवं निराकारोपासनाया एव कैवल्योपयोगित्वे आमृत्योरसौ कथं शिवोपासनायां प्रवृत्तः। तस्य किं निःश्रेयसवासना नासीत्। उदयनाचार्य्यव्यवस्था भ्रममूलेति न वयं वक्तुं प्रभवामः।

उदयनाचार्य्यकारिकास्थ-"विश्ववि"दित्यंशेन ब्रह्मणो ज्ञानस्वरूपतावादो निरस्तः। वेदव्यासकृतब्रह्मसूत्रेणापि तस्य ज्ञानाश्रयत्वमेव सुस्पष्टं प्रतिपादितम्। सूत्रं यथा "ज्ञोऽतएव"। अस्य भावार्थः। "जन्माद्यस्य यत" इति सूत्रेण ब्रह्मणो जगत्कर्त्तृत्वं लब्धम्, एवञ्च ब्रह्म यतो जगत्कर्त्तृ अतएव ज्ञः अर्थात् ज्ञानाश्रयः। ज्ञानवत एव कर्त्तृत्वात्, यत उपादानप्रत्यक्षवानेवोपादेयरूपं कार्य्यं करोति। एतेन ब्रह्मणि ज्ञानाश्रयताया आनुमानिकी सिद्धिरपि दर्शिता। अतएव सूत्रमध्ये "अतएवे"ति प्रयोगोऽर्थवान् भवति। सूत्रस्यैवं भावार्थं विना सूत्रमध्ये "अतएव" इत्यंशस्य केनापि सार्थक्यं कर्त्तुं न शक्यते इति मुक्तकण्ठं प्रकाशयामः। न च

"जन्माद्यस्य यतः" इति सूत्रेण ईश्वरस्यैव जगत्कर्तृत्वं प्रतिपादितं तत्र च दर्शितयुक्त्या ज्ञानाश्रयत्वमपीत्यद्वैतवादिनां मतं साधीय इति वाच्यं, ब्रह्मजिज्ञासानन्तरम् ईश्वरधर्म्मकथनस्यात्यन्तासम्भवात् "न ह्यन्यार्थप्रश्ने अन्यदुत्तरं सम्भवती"ति नियमात्। न च उपाधिविशेषावच्छिन्नब्रह्मण एव ईश्वरत्वेन तन्नासङ्गतमिति वाच्यं, तथा सति कदाचित् केनचित् करिष्यमाणस्य विष्ठाभोक्तृत्वेन शूकरादिसूत्रस्याप्यद्वैतवादिमते "अथातो ब्रह्मजिज्ञासा" इति सूत्रार्थजिज्ञासानिवर्त्तकब्रह्मसूत्रत्वसम्भवात्, शूकरादेरपि उपाध्यवच्छिन्नब्रह्मरूपत्वात्। इदमपि निपुणतरैर्विभाव्यताम्—उदयनाचार्य्यकारिकायां "कार्य्यायोजनधृत्यादे"रित्यादिभागे हेतुपञ्चम्यन्तत्वं, "विश्वविदि"त्यंशे तु प्रथमान्तत्वं; व्यासोक्तसूत्रेऽपि "अतएवे"ति प्रतीके हेतुपञ्चम्यन्तत्वं, "ज्ञ" इतिभागे प्रथमान्तत्वम्। एतावता उदयनाचार्य्यस्य भगवतो व्यासस्य च समानतात्पर्य्यं किं नायातम्? किमधिकं केनापि व्याससूत्रेण तस्य ज्ञानरूपतागन्धोऽपि न प्रतिपादितः। न चानन्दमयोऽभ्यासादिति तत्कृतसूत्रेणैव तस्य तद्रूपताप्रतिपत्तिः। सूत्रार्थस्तु आनन्दाभिन्नो मयः अर्थात् ज्ञानं भावकृदन्तमयशब्देन तथालाभात्, अभ्यासादित्यंशस्य "नित्यं विज्ञानमानन्दं ब्रह्म," "सच्चिदानन्दं ब्रह्मेति व्यजाना"दित्याद्युपनिषत्सु पुनः पुनरुक्तिदर्शनात् इत्यर्थ इति वाच्यं, जन्माद्यस्य यत इत्युपक्रान्तवैपरीत्यापत्तेः "यः सर्व्वज्ञः सर्व्ववित्," "यस्य ज्ञानमयं तप" इत्यादि बहुमहावाक्यसमानार्थकत्वानुरोधेन सम्भवत्येकवाक्यत्वे वाक्यभेदो न चेष्यते इति यावन्मीमांसकसिद्धान्तानुरोधेन च भवत्प्रदर्शितवाक्यस्थितस्य विज्ञानपदस्य चित्पदस्य च कर्तृविहितप्रत्ययबलेन कृद्विहितो

भावो द्रव्यवत्प्रकाशत इति शाब्दिकसिद्धान्तमवलम्ब्य निरूढ़-लक्षणया वा ज्ञानाश्रयपरतया व्याख्येयत्वात्। अपि च सम-नियतधर्म्मावच्छिन्न-वाचकपदयो-र्विरुद्धधर्म्मावच्छिन्न-वाचकपदयोश्च कर्म्मधारयसमासासम्भवेनानन्द इत्यत्रैकवचनानुपपत्तेः अद्वैतवादि-मते तयोः सामनैयत्यात् अपरयावद्दूरदर्शिमते तु ज्ञानत्वानन्द-त्वयोः परस्परं विरुद्धत्वात्। आनन्दपदमयपदयोर्द्वन्द्वे तु "अप्येक-दन्तहेरम्ब" इत्यादिवत् एकवचनभिन्नविभक्त्यन्ततापत्तेः क्लीव-लिङ्गतापत्तेर्व्वा। अस्माभिश्चानन्दमयोऽभ्यासादिति सूत्रतात्पर्य्य-विषया विविधार्था विशदभावेन प्राक् प्रदर्शिताः।

अद्वैतवादिनां तृप्तिर्न स्याद्युक्तिशतैरपि।
न भूरिवारिणा शाम्येत्पिपासा सान्निपातिकी॥

न च शिवभवादिशब्दो निराकारमपि ब्रह्माभिधत्ते एवञ्च तच्छब्दप्रयोगस्तस्य नायुक्त इति वाच्यं, निराकारब्रह्मणि तत्त-च्छब्दस्य कोषाप्राप्तत्वादवैदिकत्वात् शिष्टाव्यवहाराच्च। एवञ्च प्राग्दर्शितप्राणिनां साकारत्वेन ब्रह्मपरिज्ञाने जातेऽपि तत्सकल-धर्म्मप्रकारेण प्रामाण्यज्ञानास्कन्दित-तज्ज्ञानाजननात् न ते मुक्तिभाजोऽभवन्, प्रामाण्यज्ञानास्कन्दितज्ञानस्यैव मुक्तौ हेतु-त्वात्। योगमन्तरेण सर्व्वविषयकज्ञानं न हि सम्भवति तज्ज्ञानं विना च विशेषणज्ञानरूपकारणाभावेन सर्व्वज्ञसर्व्वकर्त्तृत्वादिज्ञान-स्योत्पादासम्भवात् विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वात्। न च प्रमेयत्वादिना सर्व्वविषयकं ज्ञानमयोगिनामपि सम्भवतीति तज्ज्ञानमूलकस्य सर्व्वज्ञत्वज्ञानस्य न दुर्भिक्षतेति वाच्यं, सामान्य-लक्षणारूपसन्निकर्षेण कथञ्चित्तादृशज्ञानोत्पादसम्भवेऽपि । "यः सर्व्वज्ञः सर्व्ववि"दित्युपनिषदंशस्थितपुनरुक्तसर्व्वविल्पदसार्थक्याय

दीधितिकृद्व्याख्यातस्य विशेषरूपेणापि सर्व्वज्ञत्वस्य परमेश्वरपरमतत्त्वरूपतायाः शास्त्रीयत्वेन तादृरूप्येणावधारणस्यापि मोचेऽपेक्षणीयत्वात् ।

"तारकं सर्व्वविषयं सर्व्वथा विषयमक्रमञ्च" इति पातञ्जलसूत्रेणापि यावत्पदार्थानां प्रत्येकमात्रवृत्तिरूपैरेकदोत्पन्नमवधारणमेव सर्व्वज्ञत्वावधारणमुत्पाद्य मुक्तिं जनयतीति प्रतिपादितम् । अद्वैतवादिमतन्तु सर्व्ववस्तुषु ब्रह्माभेदविषयकस्य ब्रह्मांशे विशेष्यीभूतसर्व्वपदार्थांशे च निष्प्रकारकस्यैव तात्त्विकज्ञानस्य मुक्तिप्रयोजकत्वं, तच्च न पतञ्जलिमहर्षिसम्मतं न कस्यापि व्युत्पन्नस्य सम्मतञ्च, स्वप्रणीतसूत्रस्थसर्व्वथेत्यनेन अन्वयिनो ज्ञाने निष्प्रकारकत्वस्य निराकृतत्वात् तादात्म्यसम्बन्धेनान्वयबोधस्थले तदंशे निष्प्रकारकान्वयबोधस्य यावद्व्युत्पन्नसिद्धान्तविरुद्धत्वाच्च । अद्वैतवादिभिः स्वप्रकारकत्वेन तयोरन्वयबोधस्वीकारे तेषामद्वैतसिद्धान्तव्याघातः स्यात् । एतावतेत्येवावधारितं दर्शितसकलधर्म्मप्रकारेण परमेश्वरमवधारितवन्तो निःश्रेयसं लभन्ते साकारत्वमात्रेण च स्वर्गमतो द्विविधमेव ज्ञानं परमप्रयोजनं जनयितुं प्रभवति । साकारत्वेन ब्रह्मोपासनैवापवर्गस्वर्गादिकं जनयेत् । मार्कण्डेयवाक्यमपीति प्रमापयति यथा "सर्व्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी"ति । "तामुपैहि महाराज शरणं परमेश्वरीम् । आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥" इति च । अतएवोदयनाचार्य्यलिखनं "स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः । यदुपास्तिमसावत्र परमात्मा निरूप्यत" इति ॥ ब्रह्मणो रूपकल्पनेत्याद्यसंख्यप्रमाणं महाजनाचारञ्चावगम्यावधारितं निराकारब्रह्मज्ञानं योगिनामपि न भवितुमर्हति, तस्याज्ञेयत्वे तु बहुप्रमाणसत्त्वात् ।

आत्मा वारे श्रोतव्य इत्यादि वाक्यं श्रवणेनानुमानेनेत्यादि वाक्यञ्च परमात्मन एवोपासनापरमित्युदयनाचार्य्यादिसम्मतम्। "भगवति भवे सन्देह एव कुतः"। "तथापि न्यायचर्चेयमीशस्य मननव्यपदेशभाक्। उपासनैव क्रियते श्रवणानन्तरागता"। "कार्य्यायोजनधृत्यादे"रित्यादिवाक्यानां तत्प्रयुक्तेः। दर्शितात्मावारे इत्यादि वाक्यं जीवतत्त्वज्ञानरूपकैवल्यासन्नतरोपायबोधकम् इति गदाधरप्रभृति-ग्रन्थकार-सम्मतम्। जीवतत्त्वज्ञान-पूर्व्ववर्त्ति-परमेश्वरज्ञानञ्च तत्परमभक्तिजन्यमानसरूपमेव तच्च ज्ञानं बलवच्छुभादृष्टोत्पादनेन श्रवणमननादिरूपं जीवतत्त्वज्ञानं जनयित्वा कैवल्येनोपजीव्यते। अथ जीवतत्त्वज्ञाने श्रवणादेः क उपयोग इति चेत् यतः सर्व्वे एव मानवादयः शरीरेष्वेव सुखवत्त्वादिकं चिरनिरन्तरं प्रतीत्य सुन्दरोऽहं सुखीत्यभिलपन्ति। केचिच्च साधवोऽपि जीवगुणचाक्षुषादिकस्य चक्षुःष्ववस्थितिमवधार्य्य "चक्षू राममयं निरीक्ष्य सकलं रामात्परं त्यज्यता"मिति भाषन्ते। तेषां मध्ये वेदादिमहावाक्येषु भगवदाराधनजनितदृढ़विश्वासानां जीवेषु शरीरादिभिन्नत्वेन ज्ञानस्य तन्नतन्नेतिज्ञानपर्य्यवसितस्य निःश्रेयसोपायतया शास्त्रप्रतिपादितत्वेन अचिरावस्थायिषु शरीरादिषु जीवतत्त्वभ्रमनिवर्त्तक-तच्चिरावस्थायित्वप्रतिपादकवेदादिमहावाक्यानुसन्धानम् अवश्यम् अर्थवद्भवति। महावाक्यानि यथा "स्वर्गकामोऽश्वमेधेन यजेत," "शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते," "सुरापः श्यावदन्तः स्यात् दुश्चर्म्मा गुरुतल्पग" इत्यादीनि बहूनि। वेदादि विश्वासिनामचिरावस्थायि--शरीरादि--भिन्नत्वावधारणेऽपि जीवकदम्बं मोहावच्छिन्नब्रह्मात्मकमथवान्तःकरणात्मकं किंवा तदुभयभिन्नं विश्वव्यापकमिति संशयापनोदनार्थं पुनरनुमानम्

अवश्यमपेक्षणीयम्, एवं व्यवस्थिते दर्शनकृतः किं सुस्पष्टं प्रमाणं सहायीकृत्य निराकारपरमेश्वरोपासनाया निर्व्वाणनिदानत्वमवधारितवन्त इत्यवगन्तुं न प्रभवामः । अतएव—

चित्तं शोधय वेदबोध्यविधिना गौरीं गिरीशं हरिं
ध्यात्वा सत्यपरायणैर्मुनिगणैर्ध्यातं स्तुतं यत्पदम् ।
योगैर्ब्रह्मनिरूपणं न सुकरं तत्तत्त्वबोधाशया
द्वैताद्वैतविचारवाग्विरचनं कस्येदमाराधनम् ॥ १ ॥

प्रह्लादोऽथ भगीरथप्रभृतयश्चोत्तानपादात्मजो
देवीभक्तियुतौ समाधिसुरथौ शिष्टान् प्रविज्ञाय तान् ।
भो भो मित्र पवित्रतद्गतसदाचारः सदा शिक्ष्यतां
वाग्जालैर्विजिगीषुदर्शनकृतां युक्तौ मनो माऽर्प्यताम् ॥ २ ॥

त्रिमूर्त्तं मूर्त्तान्तस्वरपरममूर्त्त्या विरहितं
स्वरूपध्यानन्ते परममिति वाचालवचनम् ।
ममाशा किन्त्वेषा दृशदुपमिते दासहृदये
ध्रुवादीनामन्तश्चरचरणपद्मं विचरतु ॥ ३ ॥

द्रष्टुं त्वां जगदिष्टदेव सविधे दासाश्चिराशान्विता
दृष्ट्वैव स्वजनुर्मनश्च नयनं धन्यानि मन्यामहे ।
मूर्त्तिं दारुमयीं तवानुकरणं शैलीञ्च वा मृन्मयीं
पित्रोश्चित्रपटं निरीक्ष्य न हि किं चित्तं प्रमोदं भजेत् ॥ ४ ॥

पादैः कोकनदादिदम्भदलनं मीनापमानो दृशा
मालिन्यं मलयोद्भवे परिमलैर्निन्दा नवेन्दीवरे ।
कान्त्या यस्य महेशमानसहरं संरोप्य तं विग्रहं
पद्मैरङ्कितमन्मनोमयवनस्थानं विभो शोभय ॥ ५ ॥

भक्ताधीनमनन्तशक्तिसदनं निःशेषविश्वस्थितं
स्तम्भे सम्भृतनारसिंहवपुषं प्रह्लादसम्भावितम्।
विष्टब्धं सलिलानलेष्वपि शिलामृद्दारुमूर्त्त्यादिके
नो जानन्ति य एव दारुमरुवत् चेतांसि तेषां न किम्॥ ६॥
जीवाः सन्तु न सन्तु वा स्थिरतरा जन्मान्तरादीनि वा
धर्म्माः सन्तु न सन्तु वा सुखकरं स्थानान्तरं मास्तु वा।
आजीवं तव मूर्त्तयस्तदपि मे प्रीत्यास्पदं हे शिव
प्रेयः प्रीतिरपेक्षते न हि फलं प्रीतिः सुतादिष्विव॥ ७॥
स्थाणो विद्धि न वा भवाब्धितरणैस्त्वन्नामसङ्कीर्त्तनै-
स्त्वद्ध्यानैश्च मुदं समेत्य समयं संयापयामो वयम्।
श्रीखण्डाचलचारुचन्दनतरोर्मन्दानिलैः सौरभं
जिघ्रन् मोदभरं बिभर्त्ति किमिदं विद्यादयं पादपः॥ ८॥
गीतं कोकनदं सुकोमलतया त्वत्श्रीपदं श्रीप्रदं
शीतत्वाद्विषदग्धशङ्करहृदा सन्तापशान्त्यै धृतम्।
त्वं पाषाणभवा कृपास्तु न च वा मातस्तवाराधनात्
हा हा त्वत्पदमाचलिप्सुमनसस्तच्चापि दूरे स्थितम्॥ ९॥
त्वं पाषाणसुता पिता पशुपतिः स्थाणुः कदा वातनु-
स्तस्मात् स्नेहलवोऽपि नास्ति युवयोर्भृत्येन निर्द्धारितम्।
श्रीपादस्य तथापि चित्तमनिशं सेवार्थि जानामि तत्
कर्त्तुं किङ्करमेव शिष्टनिकरं युष्मत्पटुत्वं परम्॥ १०॥

भगवदुपासनाया श्रयं क्रमः। मुमुक्षूणां यावत्कालं वहि-र्वस्तुषु मनः सञ्चरेत्, तावत्कालं तत्सञ्चरणसङ्कोचार्थं पामराणामपि परमानन्दकरं परमेश्वरविविधकलेवरं प्रकारीकृत्य भगवद्भावनया तैस्तावन्तः समया यापयितव्याः। तादृशभावनया च तत्कृपां

लभमानानां तेषां तद्बलोपजीवकचित्तैकाग्रताजनने सति गुहादि-रहस्यस्थाने यथाकामं प्राग्दर्शितैकतरतेजोमयकलेवरवत्त्वेन परमेश्वरं निरन्तरं भावयन्तो निःश्रेयसं भजन्ते। ईदृशी च भावना यातविवेकानामपि शङ्कराचार्य्यप्रभृतीनां न हि जायते स्म, तेषां वहिर्वस्तुषु चित्तसञ्चरणानिवृत्तेः। ईदृग्भावनानिपुणमहाजन-बोधकं प्राचीनवाक्यं यथा, "धन्यानां गिरिकन्दरोदरभुवि ज्योतिः परं ध्यायतामानन्दाश्रुजलं पिबन्ति शकुना निःशङ्कमङ्के स्थिताः।" इति। एतदेव प्रमापयन्ति शिष्टपरम्पराचरितक्रियाक्रमविधा-यकानि वाक्यानि यथा—

गणेशं पूजयेदादौ सर्व्वविघ्नोपशान्तये।
ततो दिवाकरं शक्तिं शिवं विष्णुं चतुर्म्मुखम्।
श्रद्धया पूजयेन्नित्यमापद्यपि न च त्यजेत्॥

अपिच—

गौरीं गौरीसुतं सूरं विधिं विष्णुं महेश्वरम्।
अर्च्चयेत् परया भक्त्या यदीच्छेच्छुभमात्मनः॥
न यः पूजां करोत्येषां करोत्येकतरस्य वा।
स्यातां द्वावेव तौ मूढ़ौ तुल्यकिल्विषभागिनौ॥
यावन्न लभते स्थैर्य्यं नानाविषयकं मनः।
तावत्कालमुपासीत सर्व्वानेव पृथक् पृथक्॥
प्रतिरुध्य वहिर्दृष्टिं स्थिरचेता महामतिः।
तेषामेकतरं ध्यायेत् तदेव ब्रह्मचिन्तनम्॥

अलब्धस्थैर्य्यमानसैरास्तिकैर्विविधकलेवरधरपरमेश्वराराधनायाः कर्त्तव्यताबोधकं गीतास्थभगवद्वाक्यमपि यथा—"देवान् भावयतानेन ते देवा भावयन्तु वः। परस्परं भावयन्तः श्रेयः

परमवाप्स्यथ॥" गीतायां स्थानविशेषे श्रीमद्भागवतादौ च श्रीकृष्णस्यैवोपासनायाः कर्त्तव्यताबोधकानि वचनान्यपि यानि दृश्यन्ते, तानि तु भक्तिदार्ढ्यफलकान्येव न त्वपरमूर्त्तिधरपरमेश्वरोपासनावर्ज्जनीयता-तात्पर्य्यकानि, "शिवे च परमेशाने विष्णौ च परमात्मनि। अभेदबुद्ध्या वर्त्तेत भेदकृन्नरकं व्रजेत्॥" "शिवपूजाविहीनान्नं यवनान्नाधिकं स्मृतम्। यवनान्नं वरं ग्राह्यं तदन्नं न कदाचन॥" इत्यादिवचनशतसत्त्वात्। शिवसूतस्कन्द-पुराणादावपि शिवोपासनैव सकलफलदा इतिबोधकबहुवाक्यानि दृश्यन्ते। श्रीमद्भागवते "नमस्ये त्वां महादेव लोकानां गुरुमीश्वरम्। पुंसामपूर्णकामानां कामपूरामराङ्घ्रिप"मिति वाक्यमपि। मार्कण्डेयपुराणे शक्त्युपासनैव निःश्रेयसान्तनिखिलफल-विधायिनीति दृश्यते। यथा,—"तामुपैहि महाराज शरणं परमेश्वरीम्। आराधिता सैव नृणां भोगस्वर्गापवर्गदा" इति। अनेवकारः किमपरमूर्त्तिधरब्रह्मोपासनानिषेधं प्रतिपादयति? भगवद्गीता सर्व्वज्ञप्रणीतास्तु तत्र न विवादलेशोऽपि, तावता मार्कण्डेयमहर्षिर्भ्रान्तः शास्त्रान्तरकर्त्तापि भ्रान्त इति वक्तुं सभयचेतसो भवामः। एतावता एवंरीत्यैव सकलशास्त्रमीमांसा कर्त्तव्या। यन्मूर्त्तिधरपरमेश्वरमवलम्ब्य यत् शास्त्रं प्रणीतं, तत्र भक्तिदार्ढ्यार्थमेव तत्, शास्त्रकाराणां सर्व्वेषामेव प्रतारणादिदोषशून्यत्वात्।

विष्णोरर्च्चनमाचरत्यपि चिरं विद्विष्य विश्वेश्वरं
यो द्विष्टापि च दुष्टचेतनदुराचारी जगन्मातरम्।
शस्त्राघातशतं विधाय दहनैर्दग्ध्वा पुनश्चन्दने-
रालेपादिकतुल्यमस्य किमु तन्नावैधमाराधनम्॥

अथवा साकारत्वसर्व्वकर्तृत्वादिरूपदर्शितसकलधर्म्मेण ब्रह्मोपासनायामक्षमाणामपि वाराणसीमरणान्मुक्तिर्भवेदिति पुराणसाम्राज्यं प्रमापयति स्म। किमधिकमुपनिषदात्मकवेदान्तवाक्यमपि तद्‌यथा शुक्लयजुर्व्वेदीयमुपनिषद्वाक्यम्। "कैवल्यमुक्तिरेकैव पारमार्थिकरूपिणी। दुराचाररतो वापि मन्नामभजनात्प्रिये। सालोक्यमुक्तिमाप्नोति न तु लोकान्तरादिकम्॥ काश्यान्तु ब्रह्मनालेऽस्मिन् मृतो मत्तारमाप्नुयात्। पुनरावृत्तिरहितां मुक्तिं प्राप्नोति मानवः॥ यत्र कुत्रापि वा काश्यां मरणे च महेश्वरः। जन्तोर्दक्षिणकर्णे तु मत्तारं समुपादिशेत्॥ निर्धूताशेषपापौघो मत्सारूप्यं भजत्ययम्। सैव सालोक्यसारूप्यमुक्तिरित्यभिधीयते॥" एवंविधानि महावाक्यानि विश्वस्य काशीमाश्रय परात्परं विश्वेश्वरञ्च।

वैकुण्ठादपि वेधसोऽपि नगरात् पूता मघोनः पुरात्
काशीयं तव देवदेव विबुधैर्यत्र स्थितिः प्रार्थ्यते।
वेधावेधमजानतोऽत्र वसतो दासस्य दोषः प्रभो
क्षन्तव्यः कृपया निवेदनमिदं शम्भो पदाम्भोरुहे॥
कैवल्यागमसाधिनी सुरधुनी काशी च कैवल्यदा
युक्तं तद्द्वयमेव भाति भगवानन्ते महामन्त्रदः।
-जागर्त्त्येव बिभर्त्यपि त्रिजगतां माता मुदा चान्नदा
किं लब्धुं विपदास्पदे परपदे भ्रान्तं मनो भ्राम्यसि॥

यथाज्ञानमपरञ्च किञ्चिदावेदयामि।—

भो धर्म्मपरायण, बान्धवगण, स्वकीयबुद्धिबलमात्रमवलम्ब्य जड़ोपदेशमाकर्ण्य वा वेधावेधं निरूप्य सानन्दं समयं मातिपातय।

ज्ञात्वे पूर्व्वपरम्पराप्रचलिते श्रद्धां परामाश्रयन्
श्रौतं सन्त्वगतं समाचर समौ विज्ञाय वेदागमौ ।
वैधावैधनिरूपणं जड़मते शास्त्रे न ते शोभते
रूपं तत्र परत्र नेति च सखे नान्येन सन्धीयते ॥

यस्यास्ति सुष्ठु विज्ञानं वेदान्ते न्यायदर्शने ।
सम्भावयामि ग्रन्थोऽयं भवेत्तस्यैव तोषकृत् ॥

शाकाब्दे शशलक्ष्मपञ्चविषभृत्पीयूषरश्मिप्रमे
ग्रन्थो मेऽचलयुक्तिकाव्जलधितश्चिन्तामयादुत्थितः ।
पीयूषोपम एष वा विषसमः स्यादेतदास्वादनं
साधोः सम्भविताशुतोषसुमनोभावेन सम्भाव्यते ॥

समाप्तोऽयं खण्डनग्रन्थः ।